त्यर्थः वामरथस्य कण्वादिस्वरवर्जमिंजंतस्य कार्य एव शब्दस्य यत्कार्यं तत् ण्यप्रत्ययां

तस्य वामरथ्यशब्दस्य स्यादित्युक्तं भवतीत्यर्थः वटुत्वे यञञोश्चेति लुक् वामरथाः छा ३२८

तार

द्यस्यासौ कुलीनस्त्रोति कुलीनविशेषणत्वे कुलस्याद्यत्वेन प्रतीयते किंच ईकारउदात्त इ
तिस्वरेपि विशेषोस्तीति भावः वडुकुल्य इति विभाषास्त्य इति वडुच्छत्यपोन्नपदामिति त्वपू
र्वपदत्वात्तस्यपत्रयं भवत्येवेति भावः व्यरस्यादिति भ्रातुरपत्यं यदिशत्रुस्तदा भ्रातृशब्दा
त् व्यानेवस्यान्नतु व्यच्छो इत्यर्थः समुदायेनेति तत्घटितप्रत्ययेन शत्रुरूपेऽपव[illegible]त्येवाच्य
इत्यर्थः यतुरतिक्रनोत्क्रमपत्यार्थीत्रनास्येवेति तद्रुपेद्दं भाष्यविरोधादिति मनास्सीनिधा
यय ऽपाप्मनेति श्रुतिगतभ्रातृव्यशब्दस्यगतिं वदति उपचारादिति अस्त्रीपंकंपुमा
न्पाप्मापापंकिल्विषकल्मषमित्यमरः नहि पापं भ्रातुरपत्यं भवतीत्यतो भाक्त एवायं प्र
योग इति भावः रेवत्यारेवती अश्वपाली मणिपाली द्वारपालीत्यादि ठस्यकः अंगस्येत्यनु
ति३ वर्त्तनादाह अंगात्परस्येति अंगादिठकारविशेषणे इठच षष्ठकारस्य न भवति कर्मठः गोत्रस्त्रि
याः गोत्रं तु गलुचुकायन्याअपत्यं ग्लौचुकायनो जाल्मइत्यत्र प्तिनंतात् गोत्रस्याधार्थमिति वो
ध्यम् सामर्थ्यात्पूनीति गोत्राद्यपरो गोत्रप्रत्ययो नेत्युक्तत्वादिति भा[illegible]वः गार्ग्यापत्य

३२९ नस्यादितिभावः कार्त्रीपरिणरिति कर्तुरपत्यं कार्त्रं तस्यापत्यं तु कार्त्रोपगविः अत्रव्याचक्षते
कर्तृशब्दः कुर्वादिषु पठ्यते तथाच कार्त्र्यः इत्येव वर्धमानेनोदाहृतं तस्मादेव भर्तृह
र्युदाहार्यमिति दाक्षीरिति चानामध्येपस्येति वृद्धसंज्ञाभावपक्षेप्युदाहरणमिदं
दा पक्षांतरे तु फिञ् भवत्येव दाक्षायणोयाज्ञिनीत्यादेतारा इत्यमरः वाकिनादीनां पदिहव
गपु द्धमगोत्रे शब्दरूपं तत्रौमाघमेवेदं वचनमन्येषां तु मयार्थे इउदीचामित्यनुवर्त्तनाद्वि
कल्पः फलित इत्याह फिञ्वा स्यादिति वाकिनकायनिरिति वचनं वाकः सोस्यास्तीति वाकि
रे नः अतएवानिपातनादेनत् अणोएधत इतिगारेधः पृषोदरादित्वाद्दादिलोपः शाकंध्या
दित्वात्पररूपं गारेधकायनिः वार्मिवर्म्योदौत् मयार्थे चर्मवर्मे शब्दाभ्यां वीप्यादित्वादि
निः चर्मिवर्मिणोर्नलोप इति गणसूत्रं चार्मिकायणिः वार्मिकायणिः कुर्वादिकते नका
रस्यानंत्यत्वान्नलोपाप्राप्तौ वचनं नचकुद्पराद्दे रस्तीति वाच्यं फस्यानादित्वादापना
देशाभावप्रसंगात् वाकिनेरिति अतइञ्फिञभावेनत्सान्निपोगशिष्टः कुगत्र न भव
ति एवं गारेधिः चार्मिण इत्याद्यूह्यम् पूर्वोत्तात् उदीचां वृद्धादित्यनुवर्त्तत इत्याशयेना ३२९

२१२

त्राः कण्वादिभ्यो गोत्रे इति छापवादोऽण् वामरथी वामरथ्यायनी स्त्री पञ्चमस्य प्राचां ष्फ
स्तद्धित इति ङीष् ष्फौ वामरथ्यानि संघांकलक्षणानि संघांकलक्षणेष्विति छाप
वादोऽण् सत्वं कारस्कलभीकारबुद्धिकारेत्यादि हारिवेणव इति एतिसंज्ञायामिति षत्वस्या
सिद्धत्वात्सेनांतोयं तद्धिताण् इति उदीचामिञो पवादः अस्मादुपसंख्यानाच्छिवादिषु तक्ष
न् शब्दपाठोऽनार्ष इति गम्यते वृत्तिकारस्तु तक्षन्शब्दं शिवादिषु पठित्वा कारिल
क्षणमुदीचामिञमपमण् बाधते एषस्पतु बाधानैष्यत इत्याह तद्धन्तु चेच्छेनास्माभि
रपि तत्र तथैव व्याख्यातं फलाविशेषाभावात् कौशल्यपरमप्रकृतेरेवावामिति यदितु
वृद्धेत्कोसलेति ज्यङ् तात्कोसलशब्दात्कारिलक्षणएयं तात्कर्मारशब्दाच्चायं विधिः
स्यात्तदा दून्येव प्रसज्येतेति भावः छागेति दगुशब्दस्याप्युपलक्षणमेतत्तथाहि च प्रकरणे
दगुकोसलकर्मारछागवृषाणां युट् द्व्यादिभ्यः स्यादिति वार्तिकात् आदिष्टस्यायन्नादेशा
स्येत्यर्थः अन्यथा प्राति पदोक्ते युटि कृते प्रत्ययादित्वाभावात्कौसल्यायनीरित्यादे
फस्यायनादेशो न स्यात् टाकि कृते तु दागव्यायनीरित्यत्र श्रेणुरुणो अन्यत्रालोपश्च

३३० विषयादितिप्राप्तोवुञ्ञ्बाध्यते कुरोरिति कुरुशब्दोनजनपदवाचीति प्राग्दीव्यतीये अणिसिद्धे
तद्राजसंज्ञार्थंवचनंजनपदवाचित्वेतुमगधेत्येवासिद्धं पांडोर्ड्यण् ण्यत्करणंतु पांड्या
भार्याइत्यत्रवृद्धिनिमित्तस्येतिपुंवद्भावप्रतिषेधार्थं युधिष्ठिरपितृवाचिनोगुणवाचिनश्च
पांडोर्नेहयद्गृहणंजनपदशब्दादित्युक्तेतदधिपतिवाचिनएवोपस्थानात् वक्ष्यति तपरक
रणंकिंकौमारः कुमारीशब्दोहिजनपदस्तद्विषयवचनः कुरुनादिकार आदिर्येषांतेना
दयः कुरुशब्दाद्यज्लक्षणे अणिप्राप्तेनादिभ्यस्त्वञिप्राप्तेवचनं उदुंबरादयइति उ
दुंबरास्तिलखलामद्रकारायुगंधराभुलिंगाशरदंडाश्च शाल्वावयवसंज्ञिकाइ
तिवृत्तिः औदुंबरिस्तैलखलिः माद्रकारिः यौगंधरिरित्यादीन्युदाहर्तव्यानि ते
तद्राजाः अञादय इतिततः प्राचीनास्तुतच्छब्दे ननपरामृश्यंते गोत्रपुवसंज्ञाकांडे
नविच्छेदादेतदर्थमेवाहितत्कांडमध्येकृतमाचार्येणेत्याहुः वस्तुतस्तुतद्राजइत्य
धिकृत्यजनपदशब्दात्क्षत्रियादञित्यादिसूत्राणामारंभे गोत्रपुत्रसंज्ञाकांडस्यम
ध्येपाठाभावेपिनक्षतिरित्यन्ये तद्राजस्यतदर्थेति तद्राजप्रत्ययपार्थेनकृतेइत्यर्थः॥ ३३०

ह वा किं जासिद्ध इति नेनैव सूत्रेण किं नि सिद्धे नेन तु कुणे व वा विधीयते इति भावः प्राचाम
वृद्धात् प्राचां ग्रहणं पूजार्थं अवृद्धादिति किम् राजदन्तिः बहुलग्रहणान्नेह दाक्षिः मानुषः
मनुष्य इति जातिशब्दावेतौ अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः नकारस्य च
मूर्द्धन्यस्तेन सिध्यति माणवः णत्वविधानार्थमिदं माणवः सिद्धत्वात् अनधीतवेदत्वा
न्मूढत्वं विहिता ननु षष्ठानात्र कुत्सितत्वं इह वचनं ब्राह्मण माणवेति णत्वनिपातनाल्लु
क्ष्यमित्याहुः जनपद [illegible] क्षत्रियेति [illegible] जनपदवाची सन् यः क्षत्रियवाचीत्यर्थः पञ्च
पि पंचाला इत्ययं जनपदे बहुवचनान्ताः क्षत्रिये त्वेकवचनान्तास्तर्षपि प्रातिपदिकस्योभय
वाचित्वमक्षतमेवेति बोध्यम् जनपदशब्दात् किं द्रुह्योरपत्यं द्रौह्यवः केवलक्षत्रियवा
स्या ४ च्यं क्षत्रियादिति किं ब्राह्मणे पंचालस्यापत्यं पांचालिरिति वृत्तिकारादयः बाह्वादिष्व
स्य पाठादिह प्रत्युदाहरणं चिन्त्यमित्यन्ये क्षत्रियसमानशब्दादिति समानः शब्दो यस्य ज
नपदं क्षत्रियेण समानशब्दः क्षत्रियसमानशब्दस्तस्मात् तस्येति षष्ठीसमर्थात् क्ष
जातिवाच्ये अपत्यप्रत्ययो भवतीत्यर्थः पंचालानां राजेति इह व्यद्धादपि बहुवचन

स्यताः यं समानशब्दो जनपदः २

२३१ नेरिति ङीब् कुरूरिति एष खलु करूऊङ् तइत्यूङ् अतस्माद् इहतद्राजेन अकारो विशेष्यते नत्व
कारेण तद्राजः विशेषणे न तदंतविधौ न्यङ् एणादीनामप्यदंतत तद्राजत्वाद्दनेनैव लुकि सि
द्धेअंबष्ठी कुंती कुरुभ्यो लुग्विधायकस्यास्त्रियामवंतीति सूत्रस्य वैयर्थ्यापत्तेः नचेष्टाप
त्तिः कौशल्यादिरूपासिद्धिप्रसंगात् तं व्याचष्टे तद्राजस्याकारस्येति सूत्रेतपरकरणं वि
स्पष्टार्थमिति भावः शूरसेनीति अञो लुकि जाते टिलोपे ङीप् नत्वजंतलक्षणो ङीन् अञो
योकारस्यादंतादिति व्याख्यानात् कारूषीति करूजः ङः करूस्तं वाष्टि करूशः वशकां
तौ मूलविभुजादित्वात् कः ग्रहिज्येति संप्रसारणं तस्यापत्यं राजा वा कारूशः स्त्रियां
कारूशी एतेन मूर्धन्योपधपाठो निरस्तः यौधेयादिभ्यो लुक् प्रतिषेधमुदाहर्तु
माह युधाम्बुकेत्यादि अतश्चेति लुकि त्विति ज्यादयस्तद्राजाइति वक्ष्यमाणत्वाद् अञो स्य
प तद्राजमस्तीति भावः यौधेयत्वात् ङीप् प्राप्तिर्नेत्याशयेनाह ङीपीति उदात्तनिवृत्तिस्वरइ
ति अनुदात्तस्य च यत्रोदात्तलोप इत्यनेन ङी उदात्तः स्यादित्यर्थः र्सिद्धंतेत्यञो लुगभा
वात् ङीन्याद्युदात्तत्वमितिज्ञेयम् स्यादेतत् अतश्चेति सूत्रेण विधीयमानो लुक् २३१

तेनैवेति किं प्रियपांचालाः साल्वइत्तीति तथाच तत्र साधुरितिपत्रत्यपस्यतद्राजत्वाभावा।
ल्लुङ्कितिभावः रघुयदुशब्दयोर्जनपदवाचित्वाभावाद्दाभ्यांपरस्यतद्राजसंज्ञानेतिलुको
व३ ऽप्रवृत्त्याराघवाणांयादवैरित्यैभवितव्यमित्याशंक्याह रघुयदुशब्दयोरिति ~~जनपदवा~~
~~चित्वाभावाद्दाभ्यांपरस्येतद्राजसंज्ञानेतिलुकोऽप्रवृत्त्याराघवाणांयादवैरित्यैभवितव्यमि~~
~~त्याशंक्याह रघुयदुशब्दयोरिति~~ लक्षणएवेति ततश्चोत्कर्षत्वादपत्यप्रत्ययो नात्रोत्पन्न
इतिभावः कंबोजाल्लुक् तद्राजस्य बहुष्विति प्रकरणे एवेदं न कृतेद्धकार्थवाचकस्या
त्रौ लुगभावप्रसंगात् यद्यपि लुगधिकारे पुनर्लुग्विधानसामर्थ्यात् द्व्येकयोरप्य
त्रौ लुग्भविष्यत्येवेति वक्तुं शक्यं तथाप्यतद्राजस्यापि लुक्प्रसंगशंकापत्तेर्लाघवा
भावाच्च तत्प्रकरणे न कृतमित्याहुः नचात्रत्र्यपत्येलक्षणएवकंबोजः कंबोजा
वित्यादिरूपसिद्धौ किमनेनसूत्रेणेति शंक्यं कांबोजइत्यादिप्रयोगस्यानिष्टवा
रणायसूत्रस्यावश्यकत्वात् सिंधुतक्षेति कंबोजशब्दस्यसिंध्वादित्वादणतस्य
तु तद्राजत्वाभावाल्लुग्नेतिभावः अवंतीकुंतीति वृद्धेदितिज्यङोलुकीनोमनुजा

३:२ माणत्वादत एवानुपदं वक्ष्यति कुमुदगंधेरपत्यं स्त्री कौमुदगंध्येति इदं च कौस्तुभानुसारि
व्याख्यानमन्यत्वमूलानुगुणमपि देवयाज्ञिकस्तु सूत्रस्थेनागोत्रार्थामिदमित्यादिमूलग्रंथेन सक्षावि
रुध्यत इति तत्रैव स्फुटीभविष्यति यद्यपि स्त्रीप्रत्ययाः प्रकृतास्तथापि पत्युर्नो यज्ञसंयोग इति
नकारस्येव ष्यङः प्रादेशत्वमेवोचितं गुणोजोरिति षष्ठी स्वरसादित्यभिप्रेत्याह ष्यङादेशः
स्यादिति ष्यङः प्रत्ययत्वेपि लस्यासिद्धिरप्रसूहेति मनोरमायां स्थितं नन्वयं ङिच्चेत्तं तादे
शं बाधित्वा परत्वात्सर्वादेशः स्यात् ङिच्चेत्यस्यानन्यार्थं ङित्वेषु स्यनङादिषु चरितार्थ
त्वात् ष्यङोनुबंधस्य यङः स्यावितिविशेषणार्थं तयास प्रयोजनत्वादित्याशंक्याह हानि
र्दिश्यमानस्येति षङ्गावितावविति ॥= अनुबंधद्वयकरणं ष्यङ इव ष्यङोपि यङः स्यावित्य
त्रं न च ष्यङः संप्रसारणमित्यत्र विशेषणार्थं तयोरुपयोगोस्त्यन्यथा याज्ञ्यापुत्रः याश्या
पतिरित्यत्र याशादिभ्यो यङिति यप्रत्ययेपि संप्रसारणप्रसंग इति वाच्यं यङः संप्रसा
रणमित्येकानुबंधेनापि तद्वारणात् लोलूयापतिरित्यत्र तु ताकारप्रत्ययेन व्यवधाना

सामान्यग्रहणार्थमन्य

चातुर्थिकानामेव तद्राजानां भवतु सन्निधानात् ननु ज्यादयस्तद्राजा इति पांचमिकानामपि त
द्राजानामिति किमनेन यौधेयादिग्रहणेन सत्ये व्याप्तिन्यायेन पांचमिकस्यापीह ग्रहणमिति
ज्ञापयितुं यौधेयादिग्रहणं तेन पर्श्वाचणं स्त्रियां लुक् सिध्यति तथा हि पर्शुः क्षत्रियो जनपदेन
समानशब्दस्तस्यापत्यं स्त्री द्व्यञ्मगधेत्यण् तस्यातश्चेति लुक् पुनः पर्श्वादिलक्षणः स्वा
र्थिको ण् तस्यापि लुक् ऊङ् ततः पर्शूः एवं रक्षस् शब्दः क्षत्रियस्तस्यापत्यं स्त्री रक्षाः पूर्ववदण् ण्यस्यापि
लुक् यत्वसंतस्येति दीर्घः उक्तं च वार्त्तिककृता पर्श्वादिभ्यो लुग्वक्तव्यः यौधादि प्रतिषेधो
वा ज्ञापकः पार्श्वादि लुक इति यौधेयीत्यादि युधायाः शुभ्राया अपत्यं स्त्रीति विग्रहः शु
भ्रादिभ्यः उक्तमामीति अव्युत्पन्नं प्रातिपदिकमिदं न तु च्छ्वान्तमयत्नेनाकेनेति ङ्व्यययाचादि
त्यामन शंक्यः गोत्रे यावितिवत् अपत्याधिकारादन्यत्र लौकिकं गोत्रमिति नेह शास्त्रीयं गृह्यते
तथा चानार्षयोरिति पर्युदासादेवावसीयते गोत्रग्रहणमिह त्यक्तुं शक्यं न चात्र गोत्रग्रहण
सामर्थ्याच्छास्त्रीयं गृह्यत इति वाच्यम् दैवदत्याप्राक्षदत्येत्यादीनामनंतरापत्येऽपीष्य

मेव गोत्रे १

३३२ ष्यङं लभते युवत्यां वा चाप्यामित्यर्थः स्वन्येति ष्याङि यङश्चाप् अन्यत्र तु क्रियाशब्दाद्दाप् स्वतज्जा
तिवाचिनस्तु ङीष् स्वतीभोज्ञेति इदमपि गणसूत्रं जातिलक्षणङीषोऽपवादः ष्यङः क्रियाशब्दा
हुदाब्ढेव भोजपतीति भोजा देवयज्ञी चतुर्भ्य इति इञन्तेभ्य इति शेषः देवापज्ञापष्टस्यापस्यस
देवयज्ञः सुचिर्वृक्षोऽपस्य सुचिवृक्षः सत्यमुग्रंपस्य सत्यमुग्रः निपातनाद्धिशेष्यस्य पूर्वीनि
पातः सुमागमश्च कांडेन विद्धः कांडेविद्धः [illegible] कर्तृकरणे कृतेति समासः निपातना
त्कांडशब्दस्य एकारः पाठांतरे कंठेविद्ध मस्य कंठे वा विद्धः कंठेविद्धाः अस्मादर्थम [illegible] स्त्रका
दित्यलुक् एभ्यः सर्वेभ्यो ष्यङ् गोत्रेपि परत्वादिति तया चोभयत्र विभाषेति भावः अत्रेद
मवधेयं आणिञोरिति सूत्रे यदि शास्त्रीयं गोत्रं गृह्यते तदा अगोत्रार्थमिदमित्यादि ग्रंथः स्व
रस्वतः संगच्छते यदि तु लौकिकं गोत्रमेव तत्र गृह्यते तदा अणिञोरिति नित्ये प्राप्ते विक
ल्पार्थमिदमित्येव व्याख्यानमुचितमिति इत्यपत्याधिकारः ॥ ० ॥ = हरे राम
तेनरक्तं तृतीयांतात्समर्थाद्यथाविहितं प्रत्ययाः स्युः रज्यते अनेनेति र्वेडुलकात्करणे
वस्त्र रागइति रंजकद्रव्यमित्यर्थः शुक्लस्य वर्णांतराधानमिह रंजेरर्थः लाक्षारोचनात्

त्संप्रसारणाभावः कौमुदगंधीपुत्र इत्यत्र त्वेकादेशस्य पूर्वांतत्वेन ग्रहणान्नास्ति व्यवधानमि
ति संप्रसारणं सिध्यति कौमुदगंध्येति अणः ष्यङ् वाराह्येति अणिञोः किं जतभागस्याप
त्यं आर्त्तभागी विदादित्वादञ् शार्ङ्गरवाद्यञ इति ङीन् टिड्ढेत्यादि नाङीविति तु वर्त्तिकारः
अणिञोरित्यत्र लौकिकं गोत्रं गृह्यते गोत्रं च चरणैरित्यत्र तु पारिभाषिकमेव गृह्यते तेन जा
तिवाचित्वाभावात् ङीनः प्राप्तिर्नास्तीति स्थितस्य गतिमाह गोत्रावयवात् अवयवशब्दो
ऽप्रधानवाची अवयवश्चासौ गोत्रं चेति कर्मधारयः निपातनाद्गोत्रशब्दस्य पूर्वनिपातः
गोत्राभिमता इति गोत्रमित्येवमभिमताः गोत्रवाचित्वेन देशविशेषप्रसिद्धाः ननु प्रव
राध्यायेपठिताः इत्यर्थः प्रवराध्याये अपाठाच्चाप्राधान्यं कुलाख्या इति कुलमाख्या
यते यैरिति कुलाख्याः पुणिकभुणिकमुखरप्रभृतयः तैर्हि कुलमाख्यायते पुणिकावयं
गोत्रेण भुणिकावयं गोत्रेणेति तत इति गोत्रावयवादित्यर्थः क्रौड्यादिभ्यश्चायं च मीनिर्दे
शात्स्त्र्यपत्यमेवेह स्त्रीप्रत्यय इत्याह ष्यङ् प्रत्यय इति क्रौडिव्याडि आपिशलि गोकक्ष्य इत्यादि
गोकक्ष्यशब्दो गर्गादियञंतस्तदर्थमाह अनणिञंतार्थश्चेति सूतेति गणे सूत्रं सूतशब्दः

२३४ मध्येपवादन्यायरीत्या पूर्वोपस्थितत्वात्स एव तत्प्रवर्त्तते यत्तु लुप्तं परत्वाद्बाध्यते छ इति तद्धित इति क्तोतो
क्तं तन्न छ प्रत्ययस्य गपत्यप्रसंगाभावात् दृष्टं सामेतत्तीयान्ताद्दृष्टमित्यर्थेऽण्दयःस्युः यद्दृष्टं तच्चेत्सा
नन्त्रास्मिन्नर्थे इति तथा च श्लोकवार्त्तिके दृष्टे सामनि जाते वाप्यण्डित्तद्वा विविधीयते तीया
दीकक् नाविद्यायाः गोत्रादंकवदिष्यत इति जाते ऽर्थे द्वि रण् स च वाडिदित्यन्वयः शात
भिषाजे ज्ञात शातभिषः शातभिषजः इहहि प्राग्दीव्यत इति शेषेऽण् का लाद्वञ् जाता
धितः स च संधिवेलादि सूत्रे शततिप्रस्तूयत इत्यपि द्विरूक्तेरण् तीयादिति तीयादीकक्
स्वार्थे भवतीत्यर्थः द्वैतीयीकः तार्तीयीकः नाविद्यायाइति विद्या वा च कात्तीयांतादीकक् क
भवतीत्यर्थः द्वितीया विद्या गोत्रादंकवदिति गोत्रप्रत्ययांतादंके यः प्रत्ययः स दृष्टे सामन्य
पि भवति औपगवेन दृष्टं औपगवकं इह गोत्रचरणाद्वुञिति वुञ् वामदेवात् ग्रहणं मातद
र्थ इत्यादि अतदर्थे यद्यतो ऽन्यात दर्थ इति विहिते नञ्स्वरे नञ्जा श्रित स्वरे अन्ययतो ग्रहणं मान
दित्यर्थः यत्यतोश्चेति सूत्रेण विधीयमानं नञः परस्य यप्रत्ययं तस्योत्तरपदस्यान्तोदात्तत्वं
वामदेव्यशब्दे माभूत्किंतु अव्ययपूर्वपदस्वरएव यथा स्यादित्येतदर्थं डित्करणमिति २३४

रत्विकृतात्तु वार्त्तिकस्यैशाकलवर्द्दमोस्तत्रेऽप्रदिशेशकलंत्वविरवंडे चरागवस्तुनिवृत्के नैइति विस्कः च
त्रिकारइतिभाष्येतु नैतदृष्टमितिभावः नील्येति नीलीऊेबाधिविशेषः अणपवादोयं नक्षत्रेण नक्ष
त्रवाचकाः शब्दाः तद्धितविषयेतयुक्तंचंद्रमसंअभिदधानाः प्रत्ययंलभंते पुष्येणेति पुष्यसमीप
स्थेन चंद्रमसेत्यर्थः एवं पौषमहः इत्यादिव्यवहारस्संगच्छते सर्वेषामप्यज्ञां पुष्ययोगसत्वेपित
त्समीपस्थचंद्रमसायोगस्यासार्वत्रिकत्वात् नक्षत्रेणेति किं चंद्रेण युक्तारात्रिः कालः किं पुष्येण
युक्तं चंद्रः लुबविशेषे पूर्वस्सूत्रस्यानुवर्त्तनादित्य नक्षत्रेण युक्तस्य कालस्याविशेषेगम्ये इत्यर्थोऽल
भ्यतेतदाह षष्टिदंडेति अद्य पुष्य इत्युक्तेयान स्तोनस्य इति विशेषे गम्यमानेपि अहोरात्रात्म
ककालस्यावांतरविशेषानवगमात् लुबेवस्यैवेतिभावः अविशेष इत्यत्र प्रसज्यप्रतिषेधाश्र
यणेत्यौषो होरात्र इत्यत्र लुब्भवति षष्टिदंडसमुदायरूपकालस्य प्रतीतावप्यवयवद्वयात्म
कस्याविशेषस्य प्रतीतेरित्याशयेनाह विशेषस्त्वेति अद्यपुष्य इति मूलेनावाहपेद्दैवीमत्र
वणेनेत्यपिउदाहरणं बोध्यं दंडाच्छः विशेषे उदाहरणमाह तिष्येत्यादि अविशेषेतूदाहर्त
व्यमद्यराधानुराधीयमिति नचात्र लुबविशेष इति अणेऽव छस्यापि लुप्स्यादिति वाच्यम्

स

२३५ तितद्दर्थे: उञ्छिनष्टिनैर्वंजुहोतीतिकल्पसूत्रव्यवहारात् सप्तमीतिनिर्धारणात्किंपापेक्षापा
त्राधिकरणत्वादितिभावः स्थंडिलात् व्रतेशास्त्रेणविहितोनियमः तस्मिन्समुदायेनग
म्येसप्तम्यंताच्चयाविहितः प्रत्ययोभवतीत्यर्थे अष्टाकपालइतिद्विगौलुगनपत्य
इत्यणोलुक् गोत्रोरवासंस्कृतंभक्षाइत्यनुवर्ततेकथमुख्योग्निरितिनदध्नसौमदोइति
चेदत्राहुः दिग्गादित्वाद्भवार्थेयदिति दध्नष्ठक् दध्नीति संस्काराभ्रिवहलवणादिनादधि
त्वकरणमात्रंपरस्तुप्राग्वहतेरित्यत्रसंस्कृतामितिहग्वस्यतेसततीयांतादोंध्यस्तेन
दध्नासंस्कृतमपिदाधिकमेव इसुसुक्तांतात्तादित्युक्तेपंगमविशेषणेनैवतांतादि
तिलब्धेग्रंतग्रहणंप्रत्ययोपदेशकालेपस्तांतः तस्मात्परस्यठस्यकादेशोयथास्यादित्ये
वमर्थितेनमायितिकइत्यत्रठस्यइकादेशेपस्येतिल्लोपेचकृतेतांतत्वेपिइकस्यकादेशो
नभवतीतिठस्येकइतिसूत्रेकैयटःसन्निपातपरिभाषयैवइकस्यकादेशोनस्यादित्यंतग्र
हणंत्यक्तुंशक्यमित्यन्ये उदश्विदितिश्वयतेःक्विपितुक्उदकसोदइत्युदादेशःइहै
वनिपातनात्संप्रसारणाभावः सास्मिन्सेति प्रथमांतादस्मिन्नितिसप्तम्यंता

पलितोर्थः नचकृतेपिङित्वेयवत्तोरित्यस्यप्रवृत्तिः कुतोनेतिशंक्यं निरनुबंधकग्रहणेनसा
नुबंधकस्यतदनुबंधकग्रहणेनातदनुबंधकस्येतिपरिभाषयोरसत्वात् इमेचपरिभाषेइहैव
ङित्वेनज्ञाप्येते तत्राद्यायाःप्रयोजनंशूरणगुणेतिसूत्रेतव्यग्रहणेतव्यतोस्यग्रहणंद्वितीयस्या
स्तुअइःग्रहणेचङोऽग्रहणंस्यपतेरःस्यस्यतचाङिःपरेतुनस्याशिष्यपत् परिवत्तोततीयां
नात्परिवत्तइत्यर्थेऽएणद्यःसुर्वः परिवत्तःसचेद्दयोभवतिरथाछादनार्थंपद्धसंकंबला
दिकंततएवसर्ववेष्टनंभवतिनतुछात्रादिभ्यइत्याशयेनाह समंतादावेष्टितइतिपरिः सर्वतोभा
वेवर्त्ततइतिभावः कौमारतेनेतिनिवृत्तं अपूर्वइतिभावप्रधानोनिर्देशइत्याह अपूर्वत्वे
इतिअपूर्वत्वंतुस्त्रियाएवेष्यतेपुरुषस्तुपूर्वभार्योस्तुवामावेत्यनाग्रहः अपूर्वपतिमिति
नपूर्वःपतिर्यस्याइतिबहुव्रीहिः कौमारःपतिरितिद्वितीयांतात्कुमारीशब्दादुपयंतरिप्रत्य
यः कौमारीति इहकुमारीशब्दात्प्रथमांतात्स्वार्थेप्रत्ययः टिड्ढाणञितिङीप् तत्रोद्धृतंसा
ऽस्मिन्पौर्णमासीतिसूत्रात्प्राकृततत्रेत्यधिकारः पात्रवाचिभ्यःसप्तम्यंतेभ्यः उद्धृतमि
त्यर्थेयथाविहितंप्रत्ययाःस्युः शरावइतिभुक्तोच्छिष्टइत्यर्थइतिवृत्तिकृत् अवशिष्टइ

३३६ पवाद् सुनासीरीयमिति शुनश्च सीरश्चेति द्वंद्वे देवताद्वंद्वे चेत्यानङ् शुनो वायुः सीरश्चादि
त्य इति निरुक्तं हरदत्तस्तु शुनासीरशब्द इंद्रस्य गुणश्चाचीत्यन्ये मन्यंत इत्याह तं याच मंत्रः
इंद्रं वयं शुनासीरमस्मिन्यज्ञे हवामह इति मरुतोस्य संतीति मरुत्वानिंद्रः मरुत्वतीयं मरुत्व
त्यं अग्नीषोमीयं अग्नीषोमयोः इदं अग्ने सोम वरुण यो वास्तुनः पति वास्तोष्पति इहैव सूत्रे
निपातनात्साधुः वेश्मभूर्वास्तुरस्त्रियां वास्तोष्पतीयं वास्तोष्पत्यं गृहमेधीयं गृहमे
ध्यं गृहमेध शब्द अकारांतस्तु याच आश्वलायनः मरुद्भ्यो गृहमेधेभ्य इति कालेभ्यो
कालवाचिभ्योपि प्रत्ययाः भवार्थे वक्ष्यंते ते सास्य देवतेत्यस्मिन्नर्थेऽनेनातिदिश्यंते
वत्करणं सर्वसादृश्यार्थं तेन यस्मात्ततो विहितस्तत एव भवति नान्यः तथैवोदाहरति
मासिकं प्रावृषेण्यमिति कालाट्ठञ् प्रावृष एण्यः डामहक्मिति एतच्च रत्यायनुरोधेनो
क्तं भाष्ये तु आनङ् इद्धो महच्च प्रत्ययश्चानिपात्यते तेनावग्रहः सिध्यतीत्युक्तं साकार
पाठे ति अन्यथा प्राक्के पालाव वा यव कार मेव पठेदिति भावः एतच्च मनोरमायां स्थितं अ
न्येतु क्रीत्यादिविसोढमित्यत्रयत्वानिवारणे पित्र्य विदुष्साम इत्यादौ अस्य दैवयत्वं तत्र

थेप्रत्ययः सर्वेषः प्रथमांतार्थस्य चेत्पौर्णमासीभवति इतिशब्दादिति सहिलौकिकींविव
क्षामनुसारयतीवृत्तिकृतानुसूत्रे एवसंज्ञायामितिव्याहितंपौर्णमासीति पूर्णोमासोऽस्यां
तिप्रयावितिवक्तुंचीर्हैतोरनुक्तादित्वात् स्वार्थिकोणिति हरदत्तादयः तदस्मिन्वर्ततइत्यधिका
रे पूर्णमासादणवक्तव्यइतिवार्तिकंनकर्तव्यमितितदाशयः सास्येति प्रकृतसंज्ञासंब
ध्यमितिपुनः साग्रहणंकृतमित्याहुः इहैवसूत्रेनिपातनादेवस्वार्थेतल् मंत्रस्तुत्येति शब्द।
मंत्रेणस्तुत्याणतिस्तु शासित्यादिनाक्यपितुक् टाप् आग्नेयोवैब्राह्मणइतिइहाग्नेर्देशे
नब्राह्मणेननत्वन्यतइतिकथमयंप्रयोगइतिनशंक्यइतिभावः परत्वादादिवृद्धिरितिइदं
चसमाधानंश्रावयामित्यत्रावश्यकमितितेनैवपरिहारसंभवादित्वाविधानसामर्थ्यमिहना
स्तीति उक्तंरूपमिति नयादित्यस्यनभूइतिरूपमित्यर्थः शातंरूप्राइतिशातशब्दोनंतवच
स्वेति नःसोमीतिहलस्ताद्धितेयलोपः रीङृतः ऋग्रेगवत्तपरिभाषयाप्रकृतसार्वेति दीर्घोनप्र
वर्ततइतिदीर्घग्रहणमित्याहुः यस्येतिचेति पित्रीयतीत्यत्ररीङ्घेस्सावकाशइतिभावः
उषस्यामिति उषस्शब्दः स्त्रीलिंगोदिवोदुहितरंदेवताब्रवीति द्यावाप् अणएयपोर

३३७ प्रकृतिभावः ननु भस्याढे इत्यत्राढे तद्धिते पुंवद्भाव इत्यभ्युपगमात्तद्धितोत्पत्तेः प्रागेवाति प्रत्ययाति
रक्तौ सत्यां कनिन्युवृषीति कनिनं तत्तपाञ्ज्ञाद्युदात्तत्वादणसिध्यत्येवेति चेत् अत एव भाष्ये श्रि
द्वादिषु युवतिशब्दपाठः प्रत्याख्यातः इह युवतिशब्दपाठसामर्थ्यात्तु पुंवद्भावो नेति वृत्तिकारो
क्तिरप्यत एवानैरस्तान्न्वेवं गार्भिणं यौवतं गणेड इत्यादिप्रयोगा भाष्यमतेन संगच्छन्ते इत्या
शंक्याह शार्ङ्गरवादीति युवोः समाहारद्वंद्वे सौत्रं यौस्त्वम् उकारस्तूच्चारणार्थः नेत्संज्ञकः तेन
नंदनः कारकः नंदना कारिका इत्यत्रोगिल्लक्षणो नुम् ङीपौ न स्तः अनुनासिकयणोरिति
किं ऊर्णायुः प्रकृत्याक इति इह राजन्यमनुष्यग्रहणं व्यर्थं रूढिशब्दत्वेन अपत्यस्य चेति य
लोपस्य प्राप्त्यभावादत एव गोत्राद्धेत्वत्र तयोर्ग्रहणं सार्थकमन्यथा गोत्रग्रहणेनैव सिद्ध
त्वयोर्ग्रहणं न कुर्यादित्याहुः स्त्रनो भावो यौवनिका मनोज्ञादित्वाद्वुञ् वार्धकामिति यदि
रद्धत्वेऽपि वार्धकामिति प्रयोगोऽस्ति तर्हि मनोज्ञादेत्वं कल्पनीयमित्याहुः ब्राह्मणमाणव
नत्त्रयोप्य मीरद्धात्तेभ्यः प्रकृतोपजे वास्तु रद्धाद्यजिवा रूपे विशेषाभावात् नापि स्वरे

हि एवं तात् क्विप्यविदूरित्यादिरूपसिद्ध्ये सकारपाठसामर्थ्यस्योपक्षीणत्वात् तस्मादविसोढमित्या
दि भाष्यकृदुदाहरणेषु सकारपाठसामर्थ्यादिति व्याख्येयमित्याहुः तस्य समूहः इहाचित्तात् ढ
कमनुदात्तादेरञ् गोत्रांतादुञ् केदाराद्यञ्चेत्यादिनाप्रतिपदं यञादीञ्श्च वक्ष्यति तथा चाचित्तवदा
द्युदात्तमगोत्रांतं प्रतिपदोक्तप्रत्ययपरहितमिहोदाहरणमित्याशयेनोदाहरति काकं वाकमिति ए
वं वार्कं काक वक वृक शब्दाः प्राणिनां कुपूर्वाणामिति फिट्सूत्रेणाद्युदात्ताः प्राणिवाचिनां येञा
दिभूताः कवर्गात् पूर्वैते वा अनुदात्ताः स्युरिति सूत्रार्थः अपादिप्राक्शाकटेरित्याधिकारात् यत्तु
वृत्तिन्यासयोः शौकमित्युदाहृतं तदुपेक्ष्यं खंडिकादिषु शुक्रशब्दस्य पाठात् तत्रांञो भाव्यमिति ना
हरदत्तादयः भि क्षादिभ्योण् भैक्षामिति अचित्तत्वात् ढक्प्राप्तः गार्भिणमिति अनुदात्तादित्वा
दञ् प्राप्तः सति हि तस्मिन् आद्युदात्तत्वात् टिलोपो स्यात् तं न च भस्याढे तद्धिते पुंवाच्च रूपातिदेशा
न्न [illegible] टिलोपः स्यादिति वाच्यम् हास्तिनीनां समूहो हास्तिकमित्यत्रापि टिलोपापत्तेः
तस्मात् स्त्रीप्रत्ययनिवृत्तिमात्रपरं तत् न तु रूपातिदेशकमिति बोध्यम् यौवनमिति युव
तिशब्दस्यानुदात्तादित्वादञि प्राप्ते अण्यर्थमिह पाठः पुंवद्भावात् तिप्रत्ययनिवृत्तिः अन्निति

३३८ द्वादावित्तत्वेनठक् विषयोदेशेतस्येत्यनुवर्त्तेत इत्याह वक्ष्यमाणादिति विषयशब्दार्थमाह अ
त्यंतेति भौरिक्याद्याभ्यां गणाभ्यां यथासंख्यमेतौ प्रत्ययौस्तः भौरिकिविधमित्यादि क्ली
बत्वंलोकात् सोस्यादिरिति छंदोनामाक्षरे यजानिबंधनंपंक्त्यादिरिह विवक्षितं द्वाच
कात्प्रथमांतात् सेत्यादिमातिप्रत्ययः स्यात् यक्त्यादिमान्सप्रगाथश्चेत् प्रग्रथ्यत इतिप्र
गाथः ग्रंथसंदर्भे इत्यस्मादकर्त्तरिचकारकइतिकर्मणिघञ् पृषोदरादित्वाद्रेफनका
रयोर्लोपः अन्येतु प्रगीयतइतिप्रगाथः गैशब्दे इत्यत उषिकुषिगार्त्तिभ्यस्थनित्याहुः
यत्रद्वेऋचावावृत्यातिस्रः क्रियंतेसप्रगाथः त्रैष्टुभमिति स्वार्थिकाः प्रत्ययाः प्रकृतितो
लिंगवचनान्यतिवर्त्तंतइतिन्यायेन क्लीबतेतिभावः संग्रामेननुप्रथमादित्याधिकारा
त् प्रथमोच्चारितसंग्रामवाचिन एवप्रत्ययः प्राप्नोतिनप्रयोजनयोद्धृभ्यइत्यत आह
सोस्येतिइति एवंप्रथमांतविशेषणद्वाराप्रयोजनयोद्धृणांप्रकृतित्वम् अस्येतिप्र
त्ययार्थविशेषणद्वारासंग्रामस्यप्रत्ययार्थत्वं वक्तुंशक्यमितिभावः तथाचायमिहसू
त्रार्थः प्रयोजनवाचिभ्योयोद्धृवाचिभ्यश्चप्रथमांतेभ्योऽस्येतिषष्ठ्यंतार्थे अण्स्यात्स ३३८

चे३

विशेषः अभयाभ्याद्युदात्तत्वात् स्त्रियांविशेषस्तु नशंक्यः अतएवनपुंसकत्वात् यज्ञश्रोत्य
त्रावत्यग्रहणाच्च ठञ्तुनानुवर्त्तिष्यते अस्वरितत्वादितिचेत्सत्यं अरंडादपिकुतश्चिद्वि
६३ धानार्थंपं [illegible] वचनं तात्सिद्धार्थानुवादकंवार्त्तिकमाह पृष्ठादिति पृष्ठंस्तोत्रविशेषः पृष्ठ्यइति
पृष्ठानांसमूहः पृष्ठ्यः षडहइतितु मत्वर्थलक्षणपाठ्यो घ्यः ग्रामजन चतिकृतात्तु वार्त्तिक
स्यसहापशब्दोपिस्त्रेप्रदीपः अनुदात्तादेरञ् आद्यपिकं शाष्कुलिकमित्यादौपरत्वा
दाचेत्रहलसिद्धेनोरितिठगेवेत्याशयेनेह सूत्रेचेत्वंदमुदाहरति कापोतमिति लघा
वंतइति फिट्सूत्रेणकपोतमयूरशब्दौमध्योदात्तौनच शाकुनीनांचलघुपूर्वमित्याद्युदात्ता
[illegible]विति शंक्यं अंत्यात्पूर्वलघूदात्तमितित व्याख्यानादित्याहुः खंडिका आद्युदात्ता
र्थमाचेत्ताद्रु का बाधनार्थंवचनं चरणेभ्यः यस्याः प्रवृत्तेर्द [illegible]
[illegible] समूहे पिस्यादित्यर्थः वुजादयोहि चरणेभ्योवक्ष्यंते तत्रचरणेद्धर्माम्नाययोरि
तितुवार्त्तिकं तदप्यनेनैवातिदेशसूत्रेणज्ञाप्यते काठकामित्यादि गोत्रचरणाद्वुञ्
[illegible] हुंदोजोषिकेतिज्यः बज्रुणावितिपचासंख्येस्तः ठग्रणावितिकेशाश

२३९ त्वातेपादकप्रातिशारवमित्यर्थः नेष्यतेइतिअनभिधानादितिभावः त्रिविधेतितिस्रोविधा
अधीतइतिविग्रहेतुतद्धितार्थेद्विगौत्रिविधइत्येवस्यात्द्विगोर्लुगनपत्यइतिलुकःप्र
वृत्तेरितिभावः आख्यापकेतिगद्यपद्यरूपोग्रंथविशेषः इत्यर्थः सर्वादेरितिसादेरित्येव
सिद्धेसर्वादिग्रहणमपवत्यादिभाषाज्ञापनार्थंसर्ववेदिकइतिवार्त्तिकांतमधीतइत्यर्थः
अतवचनेअव्ययीभावः अव्ययीभावेचाकालइतिसहस्यसभावः इकन्निपदशब्दउत्त
रपदंयस्यतस्मादिकन्शतात्शतशब्दात्षष्टिशब्दाच्चपरोयःपथिन्शब्दस्तदंतात्तुषि
कन्वाच्यइत्यर्थः शतपथिकइतिवार्त्तिकेनातुवार्त्तिकेवहुलमितिदूरापेत्वा शात
सपइत्यणंतमप्युदाहृतंतत्तुभाष्येनदृष्टंषित्वंफलंदर्शयतिशतपथिकीति अणवा
यतार्थमितिभाष्येतुप्रत्याख्यातमेवेदंसूत्रंतद्धीत्यात्वाणेष्यतइति अनभिधानान्नेतिवाणोर्थं
उक्थादिष्वेववसंतादीन्पठित्वावसंतादिषुवाउक्थादीन्पठित्वाअन्यतरच्छक्यमवक्तुं
अथर्वाणमितिअथर्वणाप्रोक्तः उपचारादथर्वाअथर्वणातेनप्रोक्तमित्यधिकारेऋषिभ्यो
लुग्वक्तव्यः वासिष्ठः विश्वामित्रोनुवाक इत्युदाहृत्यअथर्वणेवाअथर्वाअथर्वण इति २३९

च षष्ठ्यंतार्थः संग्रामश्चेदिति तदस्यां प्रथमांतेभ्योऽस्येति षष्ठ्यंतार्थे तान्प्रहरणोपाधिकात्स
प्तम्यंतार्थे अणस्यात्सा चेत्सप्तम्यंतार्थः क्रीडा भवति प्रहरणं किं मालाभूषणमस्यां क्रीडायां किं
खड्गप्रहरणमस्यां सैनापत्यं घञः कृद्ग्रहणादिति तन्न श्येनंपातेत्यत्र जिणातीत्यंगस्य विधीपमा
नात्वृद्धिः सिद्धा श्येनपातस्यापि घञंतत्वादिति भावः घञः किं श्येनपतनमस्यां वर्त्तते क्रिया
किंप्रकारोऽस्यां वर्त्तते तद्दर्शयामीति प्रश्ने तेषु नः स्यामित्युक्तिः क्रीडायामित्यस्यानिवृत्तिः यथा
स्यादित्यत एवाह दंडपातोऽस्यां तिथाविति तदधीतेति द्वितीयांतादध्येतरि वेदितरि च प्र
त्ययः स्यात् द्विरूपग्रहणमधीयाने विदुषि च प्रत्येकं विधानार्थं तेनात्र रत्नक्रतुवसंतादयः
शब्दास्तत्प्रतिपादकग्रंथे गौणा अत एवाध्येयाने विदुषि चापि प्रत्ययं प्राप्नुवंत्यन्यथा तेषाम
ध्ययनासंभवेन वेदितर्येव प्रत्ययः स्यादिति भावः क्रतूक्थादि कठविशेषेति स्वरूपस
तुनग्रहणं तथात्वे सत्युक्थादिष्वेव क्रतुशब्दः पठ्येत नापि क्रतुपर्यायमुक्थादिगणेप
ठशब्दपाठादिति भावः अध्येतरीति अध्येतर्यपीत्यर्थः आग्निष्टोमिक इति संस्थावि
शेषवाचकस्याग्निष्टोमशब्दस्य तत्संस्थाके क्रतौ निरूढप्रयोगः तल्लक्षणेत्यादित

३४० योगादस्यसाधुत्वमितिज्ञेयम्इञञ्योतितिसूत्रैर्लुगितिलुक्यपिप्रत्ययलक्षणेनइञंतमस्तीति
भावः गोत्रेयइञितिगोत्रमिहशास्त्रीयंनतुलौकिकमिति तत्रवदपत्यइतिभावः स्वरेइतिलु
गभावेप्रत्ययस्वरेणतोदात्तत्वंस्त्रियांचङीप्स्यात् लुकिसतिङीकारउदात्तः टाप्वासिध्यती
तिभावः अष्टकमिति संख्यायाः संज्ञासंघसूत्राध्ययनेष्विति संख्यायाः अतिशदंतायाः कन्
संख्याप्रकृतिकादिति संख्याप्रकृतिकप्रत्ययांतादित्यर्थः कालापकइतिकलापिकश्यवृप्रो
क्तार्थेऽण् सब्रह्मचारीत्युपसंख्यानाट्टिलोपः ततोऽध्येतर्यण् तस्यप्रोक्तात्लुगितिलुक्क
लापानामाम्नायइत्यर्थे गोत्रचरणाद्वुञ् ततोऽध्येतृवेदितृणोनलुक् स्वरेस्त्रियांचविशे
षः छंदोब्राह्मणानिइहमंडूकप्लुत्यानुवर्तंप्रोक्तादितिपंचम्यंतंजसंतत्वेनविपरिणम्यते छंदो
ब्राह्मणानीत्यनेनसामानाधिकरण्यात् प्रोक्तशब्दस्यप्रोक्तार्थकेप्रत्ययेलाक्षणिकइत्याश
येनाह प्रोक्तप्रत्ययांतानीति तद्विषयाणीति तच्छंदोवेदनाध्येतृवेदितृप्रत्ययःपरामृश्यते वि
षयास्विहानन्यभावचीनतुदेशवाचीत्यभिप्रेत्याह प्रत्ययंविनानत्प्रोज्यानीत्यर्थः इ
तिपाणिनीयंपाणिनीयाः इतिवदनियमेनप्रयोगेप्राप्तेनियमार्थमेतदितिभावः छंदो ३४०

भाष्योक्तेः साधुः गार्ग्याविदग्धाइञएपनपत्यइतिसिद्धेऽनुवर्त्तेप्याणिप्रकृतिभावार्थमपमारं
त्रः गार्ग्यायनः वैदशिनः कैशिनः गार्गिणः पाणिनः एयद्वात्रिपार्श्वकौरव्यइति कुर्वादिभ्यो एयः
तत इञो लुक् कौरव्यः पुत्रः नतु तिकादिषु कौरव्यशब्दः पठ्यते तत्पाच कौटव्यापणिरितिफिञ भा
व्यं नाविज्ञेति चेत्सत्यं कुरुनादिभ्यो ण्य इति द्वाविपगोत्रे विहितो यो एयस्तदंतं तत्र पठ्यते प्रकृते
वृः स एगोत्रप्रत्ययांतमित्यवधेयं श्वाफल्क इति ऋष्यंधकेत्वण् ततो इञो लुक् श्वाफल्कः
पुत्रः वासिष्ठ इति ऋष्यण् तत इञो लुक् वासिष्ठः पुत्रः तैकायनिरिति तिकादिभ्यः फिञ् ततो
णो लुक् तैकायनिः पुत्रः वामरथ्या इति कुर्वादित्वात् एयस्ततो वृद्धाच्छं वाधित्वाक एवादि
भ्यो गोत्रइति शैविकोण् इतीतिण्यः द्वात्रिपार्श्वेत्युदाहृतं तत्सूत्रे णित्यर्थः ऋष्यण् एवेतिपाणि
नशाब्दे तु औत्सर्गिक एवाणीति भावः नन्विदं वान्यस्मिन्सपिंड इति सूत्रस्य भाष्यके पठाभ्यां
विरुध्यते सूत्रे द्वेवापत्यानि पुमांसोऽनंतरः इतश्चानिञ इति ठक् तदंतात् यूनि तत इञ तस्य एप
द्वात्रिपेति लुक् अत्रिभृगुकुत्सेति ठकोपि लुगेत्युक्तत्वात् ऋष्यंधकेत्यण् एव ग्रहणे तु ठको
ऽग्रहणं ततः परस्येञो लुङ् स्यादित्याड्यः वसुतस्तु दाक्षीपुत्रस्य पाणिनेरिति भाष्यप्र

३८१ धिकरणेपन्व्याख्यानादिष्टं सिध्यति किमंगग्रहणेनेत्याशंकांनिवारयत्यंगग्रहणमिति मत्वं
तविशेषणमिति संभवाति सामानाधिकरण्ये वैयधिकरणस्यान्याय्यत्वादंगग्रहणभा
वेमत्वंतविशेषणं स्यादेवतत्त्राहि मतामित्यादावतिप्रसंगः स्यादितिभावः रोणीरोणी
शब्दः प्रत्ययमुत्पादयतीत्यर्थस्तथाच पालितमाह रोणीशब्दादितिपंचम्यां स्सौत्रो लुगि
त्यन्ये तदंतादिति येनविधिरितिसूत्रेभाष्यस्याविशेषणविशेष्ययोः कामचारमाश्रित्य
समासप्रत्ययविधौ प्रतिषेध इत्यस्य प्रत्याख्यानाद्वातदंतविधिरितिभावः वुञ्छण्ठक
इत्यंतमेकं समस्तपदं अरीहणादित्यपरंतत्रप्रथमतः कुमुदांतानां चतुर्णां द्वंद्वं विधाय
द्वितीयेन काशादिकुमुदांतद्वंद्वेन सह पुनर्द्वंद्वो बोध्यः तेन कुमुदशब्दस्य द्विः पाठेपि
नैकशेषः आदिशब्दः प्रत्येकं संबध्यत इत्याह अरीहणादिभ्य इतिपद्धाद्यंतर्गणसू
त्रमाह यध इति जनपदे लुप् तन्नाम्नीत्येवनेह उदुंबरास्संत्यस्मिन्नौदुंबरो जनपदः
नह्यत्र लुबंतं तन्नामधेयं जनपदस्येत्यादेकवचने प्राप्ते वहुवचनफलकमतिदेशमा
ह लुपियुक्तवदिति व्यक्तिवचने किं शिरीषाणामदूरभवो ग्रामः शिरीषाः वरणादिभ्य ३८१

ग्रहणादेवसिद्धेब्राह्मण ग्रहणंचिरंतनप्रोक्तब्राह्मणानामेवतद्विषयत्वार्थंतेनेहनयाज्ञवल्को
नप्रोक्तानिब्राह्मणानियाज्ञवल्कात्कण्वादिभ्योगोत्रइत्यण् आपत्यस्यचेतियलोपः याज्ञवल्का
दयोहिपाणिन्यपेक्षयाऽद्यतनाइति वृत्तिकृतांव्यवहारः चकारोनुक्तसमुच्चयार्थः तेनका
श्यपिन कौशिकिनइत्यत्रकल्पेपितद्विषयत्वंसिद्धंकाश्यप कौशिकाभ्यामृषिभ्यामिति प्रो
क्तेणिनिः अध्येत्रणलुक् छंदोब्राह्मणानीति किंपाणिनीयंव्याकरणम् अथचातुरर्थिकाः त
दस्मिन्नस्तीत्युपाधिकात्प्रथमांतादस्मिन्निति सप्तम्यंतार्थेयथाविहितंप्रत्ययःस्यात्प्रत्य
यांतंनामादेशश्चेन्मतुपोपवादः इतिशब्दस्तुसकललोकप्रसिद्धेदेशेयथास्यान्नत्वा
धुनिकसंकेतितेपीत्येतदर्थः उत्तरस्त्वत्रयेपिदेशेतन्नाम्नीत्यनुवर्त्ततेतेनानिरंतं अंत
र्भावितण्यर्थाद्धृतेः कर्मणिक्तः अदूर अदूरमंतिकंतत्रभवतीत्यदूरभवः निपातनात्सप्त
मीसमासः चातुरर्थिकात्वमिति चतुर्णामर्थानांसमाहारश्चतुरर्थीतत्रभवाश्चातुरर्थि
काः अंध्यात्मादित्वाट्ठञ् चतुर्ष्वर्थेषुभवाइतितद्धितार्थेद्विगौतुद्विगोर्लुगनपत्यइतिठ
ञोलुक्स्यात् मतोअननुमतोर्वृद्धंचइत्येवास्तुवृद्धेचोविहितोयोमतुप् तदंताद्धितीवेय

२४२ पदेपीति तस्यानिवासः अदूरभवश्चेति तद्धितैर्वोत्पद्यते किमनेन लुपो विधानेनेत्यर्थः नदृश्ये
तेति विनापि ह्याश्रियसंबंधं पंचालादिशब्दो जनपदेषु प्रयुज्यत इति नार्थः सूत्रेणेत्यर्थः प्रसं
गात्पूर्वाचार्यपरिभाषितमन्यदपि प्रत्याचष्टे प्रधानेत्यादिनाविशेषणानां चापि सूत्रपाठे
लुपि युक्तवदिति सूत्रादनंतरमेतत्सूत्रं पठित्वा तदशिष्यमित्याख्यातत्वात्तत्रैवं व्याख्यातुमुचि
तं तथापि जातेः प्रतिषेधमात्रपरमिदं नतु युक्तवद्भावपरमित्याशयेन तत्रनोक्तमित्याहुः पं
चालाः रमणीया इति कथंतर्हि पंचाला जनपदस्सुभिक्षाः संपन्नपानीय इति प्रयोग इति
चेत् जनपदविशेषणत्वादित्यवेहि पंचालविशेषणत्वाभ्युपगमे तु तद्वल्लिंगवचने स्त एव
पंचालास्सुभिक्षाः संपन्नपानीया इति हरीतक्य इति हरीतक्यादिभ्यश्च [illegible] त्यणो लुप्
तत्र हि लुबित्यतो लुबनुवर्तते खलतिकमिति वरणादिभ्यश्चेति लुप् चंचेति संज्ञाया
मिति कनो ऽमनुष्य इति लुप् चंचा तृणमयः पुमान् वरणादि चकारोऽनुक्तसमुच्चयार्थ
स्तेनास्याकृतिगणत्वं सिद्धं वरणा इति एवं कटुबदरी शिरीषाः गोदौ खलतिकमित्यादीन्यु
दाहर्तव्यानि वत्वं स्यात्सिद्धत्वात्तस्मिन्कर्तव्येऽटिलोपो न स्थानिवदित्यौत्याशयेनाह २४२

श्रोति लुप्तस्य वनं शिरीषवनं इहवनस्यातित्वमदृश्येत तत्रं श्राविभावो बाधि वनस्याति भइतिएा
त्वंस्यात् नचात्र शिरीषाणामिति षष्टी वहुवचनं कुतो नातिदिश्यत इति चेदत्राहु: वचनामिह
संख्या नत्वेकवचनादि नचैव मपि संख्यावोधकत्वेन स्नुतैव षष्टी परिगृह्यतामिति वाच्यम्
प्रत्ययस्य तद्धितरत्वं तन्नीतत्वादुक्ता येप्रथमा वाए व पुक्त्वादिति पंचालाइत्यादि पद्यप्यत्रा
तिद्येव लिंगवत्वेपीष्टा सिद्धिस्तथापि कटुवदर्या अदूरभवोग्रामः कटुवदरीत्यादि सिद्ध
ये प्रकृतातिलिंगातिदेश इति भाव: पूर्वाचार्यानुरोधेन कृतं सूत्रं संप्रति प्रत्याचष्टे तदशिष्य
मिति पंचाला: अंगा: वंगा: कलिंगा इत्यादयो जनपदस्य यथा पयं वहुवचनाद्येताएव
संज्ञा: नत्वत्र यत्नेन लिंगसंख्ये प्रतिपादनीये आपोदारा इत्यादिषु यथा नारि शास्त्रेण लिंग
संख्ये प्रतिपाद्येते इति भाव: उपजीवके प्रत्याख्यायोपजव्यं प्रत्याचष्टे लुव्योगेति जनप
दे लुप् चरणादिभ्य श्रोति द्विसूत्री लुप् शब्देन विवाहीता प्रशिष्यामिति संवध्यत एवतदाह
लुपं वयोति प्रकृति प्रत्ययार्थयो संवंधोयोग इत्याशयेन फलितमाह अवयवार्थस्येति अ
प्रत्याख्यानादिति व्याचष्टे अप्रतीतेरिति पंचालादयः शब्दा: क्षत्रियेषु यथा रूढास्तथा जान

३४३ आमलकीत्यत्रस्त्रादिष्विति पदत्वात्तु अत्रस्यादौत्सीत्यत्रतु संयोगांतलोपः स्यादितिशंकापिपरा
स्तेतिदिक् ननु प्राक्क्रियालाबवापडूवतुवे वविधीयतामथवाकुमुदनडवेतसेभ्योड्मदितिप्र
कृतस्मतुपोड्डित्वमतिदिश्यतां किमनेनड्मतुविधानेन सत्यं अन्यतोविधानार्थंतत् त
त्सिद्ध्यर्थकथनपरं वार्तिकमाह महिषाच्चेति शिखायानिर्वृत्ताद्यर्थे देशेतन्नाम्न्यण्णो
बाधनार्थं चेदं वचनं शिखाशब्दात्संज्ञायामिति पंचमे वक्ष्यमाणेनत्वदेशेपि शिखावलइतिरूपसिद्ध्य
र्थं नडादीनां नडप्लक्षबिल्ववेणुवेत्रवेतसादयो नडादयः नडाद्यंतर्गणसूत्रमाह क्रुंचेति
एवंतद्धान्नित्यपिड्भयत्रापिबह्वाः सौत्रो लुक् टेलोपइत्यतोलोपेऽनुवर्तमानेलुग्ग्रहणंव्य
र्थमित्याशंक्याह सर्वलोपार्थमिति यमात्रस्येति न चादेः परस्येतीकारस्यभाव्यमितिवाच्य
म् सूर्यतिष्येत्यतोयकारस्येव यस्येव लोपस्यानुवर्तनादितिभावः इतिचातुरर्थिकाः॥ शेषे
लक्षणंतावद्वाच्यर्थंतस्येचेतिग्रहणादुणादिष्वर्थेषु तरसूत्रानुपात्तेषु अणेविधायकमित्य
र्थः ननु लक्षणंतावद्वार्थंतस्येदमित्यनेन चाक्षुषादीनां संस्कृतं भक्षाइत्यनेन दीर्घदा
दीनांसिद्धेः न यथाधिकारोपिव्यर्थः तथाहि अधिकारस्यापत्यादिचतुरर्थीपर्यंतेष्वं

ऊपइतीति नड्वानित्यत्रापिपरत्वात्ऊपइत्यनेनैव वकारो न तु मादुपधायाः इत्यनेनेति भा
वः नचासिद्धत्वात् मादुपधायाइत्येवतत्रन्याय्यमिति वाच्यम् प्रकरणे प्रकरणमसिद्धेन
तु योगेयोगइति उपसर्गादसमासेपीत्यत्रभाष्ये निर्णीतत्वात् ननुवेतस्वानित्यत्रवेतसश
ब्दस्य स्तुवंततत्वेन पदत्वात् झलांतुपोडिति सामर्थ्यादिनोपे एकदेशविकृतन्यायेन पदत्वात्त
स्य रुत्वं स्यात् नचस्थानिवत्वेनानेर्वोहः पूर्वत्रासिद्धे तन्निषेधादिति चेन्नैवं अंतरंगरुत्वप्र
तिबहिरंगस्याटिलोपस्यासिद्धत्वात् नचषष्ठीबहिरंगपरिभाषात्रैपादिकं नाजानातीति
वाच्यम् कार्यकालपक्षास्याभ्युपगमात् नन्वेवमपि स्वादिष्विति सांतस्य पदत्वे तदाश्रय
रुत्वस्यांतरंगत्वाभावाद्बहिरंगपरिभाषा न प्रवर्तेत इति रुत्वं दुर्वारमेव न च नद्यांमत
बिति चतुष्यां मतुपो विधानाच्चातुरर्थिको ऽयं तुप् मत्वर्थीय इति नसो मत्वर्थ इत्यनेन
भत्वं शंकांटिलोपस्य स्थानिवत्वात् नचपदत्वेप्येवं तस्य रुत्वे विनाऽसह कार्यकालत्व वि
त्वा पूर्वत्रासिद्धेनेति निषेधादिति चेदत्राहुः पदसंज्ञायां यचोद्देश्यपक्षाश्रयणात्पूर्व
त्रासिद्धेनेति निषेधाप्रवर्तनात्स्थानिवत्वप्रवृत्त्या सांतस्यापदत्वादिति एतेन षष्ठी

२४८ ग्राद्र्दकादिभ्योपादिष्टः स्यात्तर्हि चतुरर्थ्यामेवेतिनियमस्यापि संभवाच्च एवं स्थितचाद्दुष
मित्यादिषु गरस्यमाणत्वादिप्रकारकवोधनापदेशकत्वमपितस्यसुवचामितिदिक्
विग्रहीतादपीत्यादि वचनमेवेदं सूत्रं यथासंख्यप्रवृत्त्यर्थं विशिष्टोच्चारणात् कुत्सि
तास्थयइति इहवहुव्रीहिरपिसुवचः इहैवानिपातनात्कोः कद्भावः कद्भावेत्रावुपसंख्या
नमितितुप्रत्याख्येयं कुत्स्यापायलोपश्चेतिगणसूत्रं कुत्स्यापांजातः कौलेपकः कात्रिडं
भिकुंडिनमाहिष्मतीत्यादि दक्षिणापश्चात्पुरसस्त्यमिति साहचर्यादितिभावः एवं चद
क्षिणात्यइत्यत्रसर्वनाम्नोवृत्तिमात्रइतिपुंवद्भावशंकैवनास्तीतिवाच्यम् पाश्चात्यइति
कथंतर्हिपश्चात्तनेः कश्चननुच्यमानइतिनचादिग्देशवाचिनिपश्चाच्छब्देसावकाश
त्यकंकालवाचिन्युटुलौवाधेते परत्वादितिवाच्यं अग्राद्पश्चादितिडिमचाद्युलो
र्वाधस्यदुर्वारत्वात् सत्यं पश्चात्तन्त्वंतिपश्चात्तनाइतिकथंचित्समाधेयं कापिश्याः
ष्फक् कापिशिशब्दात्ष्फक्स्यात् स्त्रियांङीषतदाह कापिशायनीतिरंमनुरंकवीज
नपदस्ततः ओगद्दीव्यतोऽणीत्यणप्राप्तः तद्बाधकोऽतेनावृद्धादपीतिवुञ्प्राप्तः तमपि २४८

धैयुष्मदादीनां ट्युट्युलंतानां निवृत्तिर्जातार्थसाकल्ये वा प्रयोजनं तत्र निवृत्तिस्तावन्न प्र
योजनं प्रार्द्रकाश्मलादीनामुत्करादिपाठेन इत प्रागेव घयुष्मदादयो न प्रवर्त्तंत इति ज्ञा
पनात् अन्यथा रङ्काच्छ इत्येवासिद्धे तत्पाठस्य वैयर्थ्यप्रसंगात् नाप्यर्थसाकल्यं प्रयोज
नं जाताधिकारात् प्राक् पाठसामर्थ्यादेव तल्लाभात् यदि संनिहिते जातार्थ एव घादयः
स्युः तदुत्तरेषु प्राग्दीव्यत इति विशिष्टावधिपरिछिन्ने घयुष्मदुपुविधीयमानाऽणादयः ए
व स्युः तदा जाताधिकारानंतमेव प्राग्वहतष्ठावित्यादिभिस्सह राष्ट्रावारपारेत्यादयोपि क्वा
रन् तस्मादर्थमिदं सूत्रमिति चेदत्रोच्यते शैषिकान्सरूपः शैषिकान्सरूपः शैषिको नेति
वक्ष्यमाणार्थस्य विषयलाभार्थं शेषाधिकारस्तावदावश्यकः शैषिकत्वप्रयुक्तकार्य
विशेषं ध्वनयितुं क्रियमाणः शेषाधिकार एव शैषिकान्मतुवर्थीयादित्यादि श्लो
केनाप्यवयति एव च श्लोकः सान्वियोमनुब्बियौ च भाष्ये पठितः इह तु सनन्ते पठितः इति
तत्रैव व्याख्यास्यते अपत्यादिषु घयुष्मदादीनां निवृत्त्यर्थमधिकारश्चावश्यकः न
चोक्तज्ञापकेनैव तत्सिद्धिरिति वाच्यम् ज्ञापकस्य विशेषापेक्षत्वे दोषतादवस्थ्यात्

२४५ हेतुत्वात्येनवकारस्यपकारइतितेषामाशयः प्रागादयोस्तात्यंताश्रव्ययास्तद्भिन्नास्तचनव
पाः उभयेषामपीह ग्रहणमविशेषात् कथंतर्हि संस्काराः प्राक्तनाइचेति अत्राङः काम्ब
ोजादिनः प्राक्शब्दात्यतंबाधित्वापरत्वात् तु पुलैभ्योछ्याविति वर्णोवुकवर्णेरि
ति अदूरभवश्चेत्यर्थे सुवास्त्वादित्वादण् जनपदेलुविति लुप् ह्रस्वान्तादोपदांतत्वात्
षत्वस्यप्राप्तावयमारंभः आदिग्रहणंतुव्यपेवास्मिन्विधिरितिवासिद्धेः ह्रस्वात्किं गीस्त
राद्धस्तारान्तादौकिंसार्पिस्साद्भवतिनधितेकिंसर्पिस्तरतीति डं तस्यप्रतिषेधोवक्तव्यः भिं
धुस्तरं दूरेत्यइतिदूरादागतइत्यादिरर्थः औत्तराहइति इहाद्युदात्तत्वंस्त्रियांटाप्
बोध्यः पदान्नूत्तराश्चेत्याहि प्रत्ययेनतोऽग्रग्रत्क्रियते अमेहेति परिगणनेनेत्यपोऽभा
वात्तदा औत्तराहशब्दोनोदात्तस्त्रियांङीप्विशेषः वक्ष्यमाणविति सापंचिरमित्या
स ३ दिनेतिशेषः वद्दान्तइतिष्यैस्तुडुत्यत्र दिक्पूर्वस्यसंज्ञायामित्यत्रसौत्रत्वात्पंचम्यर्थे
संप्तमीत्याशयेनाह संज्ञाभूतायाइतिमद्रेभ्योऽजबहुवचनान्तेईशाज्जनपदवाचीग्र
ह्यतेनतुमद्रपर्यायः दिशोऽमद्राणामिति दिग्वाचकादुत्तरपदस्यजनपदवाचिनः

वाधित्वा दैर्दिशेठञ् प्राप्तस्तस्य तु कोपधादण् वाध्यकस्ततोपि परत्वात् कष्ठाचारिणप्रा
प्तेऽनेन ष्फक गणो विधीयते कोपधत्वादेवाणोसिद्धेर्वः इत्यादिषु रंकुशब्दस्य पाठो मनुष्य
तंत्रस्याथो वुञ्विधानार्थ इति कैयटः अत एवाह रांकवको मनुष्य इति केचित्तु रांकवइ
ति पठ्यते तेस्तु लेखप्रमादः स्यादेतत् अमनुष्यग्रहणमिह व्यर्थं अपवादेन वुञा तत्र
ष्फक गणो वाधो नाम मनुष्य एव पर्यवसानात् अण्ग्रहणमपि व्यर्थमेव कष्ठादित्वादेवतासि
द्धेः अत्राह काशिकाकृत् नायं प्रसज्य प्रतिषेधः किंतु पर्युदासस्तेन मनुष्यभिन्ने प्राण्यन्य
दे ष्फक ठ्विधीयत इति रांकवः केवल इत्यत्र न ष्फक वुञ् विशेषविहितेन ष्फकोऽणो वा धा
मान्न दित्यण्ग्रहणं चाक्षिप्यत इति भाष्ये तु अप्राणिन्यपि ष्फकमंगीकृत्येदं द्वयमपि प्रत्या
ख्यातं द्युप्रागपागुदक्प्रतीचो यदिति सूत्रे दिव उदिति उत्वेनानिर्देशादिति भावः अपाचीदक्षिणादिक्
द्वितीयो वर्णः पकारो न तु दंतोष्ठ्यः पदि द्युप्रागपागुदगित्यादौ तपाद[र्]र्शनादिति स्थि
तं मनोरमायां केचित्तु प्राच्यवाचीप्रतीच्यस्ता इत्यमरकोशे अवाचीति दंतो[ष्ठ्य]स्य पाठ
र्कीचित् कं पुरस्कृत्य सूत्रेप्यवागीति पठित्वा अवाच्यामित्युदाहरंति प्रागपागितिवे

३४६ धानात्क एवादयश्च गर्गा यंतर्गताः गर्गादिभ्यो यञित्यत्र तु गोत्रे कुंजादिभ्य इत्यतो गोत्र
इत्यनुशास्त्रीयगोत्रमेव गृह्यते अपत्याधिकारस्यत्वात् तदेव हीजश्चेति सूत्रेनुवर्त्तत इ
ति न्यासः अपवाद इति प्रतिषेध इत्यर्थः भरता नाम ग्रहणस्येति तेन इञः प्राचामिति भ
रतेभ्यो युवप्रत्ययस्य लुङ् भवति औद्दालकिः पिता औद्दालकायन पुत्र इति आहीद गोपु
छेति सूत्रे कैयटः भवतः छादिरयं प्रत्ययो न तु शादिः पदसंज्ञार्थ सित्करणादित्याशये
नाह जेष्ठामीति काश्यपादिभ्यः इकार उच्चारणार्थ इति उभयत्र ञकार एवानुबंधस्तस्य
चत्वात्सपाठस्तु स्त्रीप्रत्यये विशेषार्थ इति भावः आपदीति गणसूत्रमिदं वृद्धादेवेति वृद्धा
ध्येन प्राचामेवेति विपरीतनियमस्तु न भवति अप्राग्देशवाचिनो वृद्धस्य उवर्णेतस्या
भावात् धन्वयोपधाद्धन्वेति न स्वरूपपर्यायपोर्ग्रहणं वृद्धत्वासंभवादित्याशयेना
ह धन्वविशेषेति ऐरावतं धन्वेति यद्यपि समानौ मरुधन्वानो इत्यमरेण पुंस्त्वमुक्तं त
थाप्याष्टकं नाम धन्वेति भाष्ये क्रस्वपांठान्न पुंसकोपि धन्वशब्दोऽस्येवेति बोध्यं उ ३४६

मद्रभिन्नस्याचामादेर्वृद्धिः स्यात् ञिति णिति किति तद्धिते इति सूत्रार्थः पौर्वमद्र इति मद्रैकदेश
मद्रशब्दस्य वृत्तौ दिक्शब्देन सामानाधिकरण्यात्तद्धितार्थेति समासः उदीच्यां दिग्ग्रह
णं निवर्त्तं उदीच्यग्रामात् किं माथुरः बह्वचः किं ध्वाजः पिप्पल्यादि ङीषंतोऽयं जीशब्द अंतोदात्ता
त्विं शार्करा धानशब्दे धाशब्दाकार उदात्तः कृदुत्तरपदप्रकृतिस्वरेण लित्स्वरस्यावस्यास्तत
शौवपुरमिति प्रनापपुरवहांताच्चेति वुञ्न भवति वृद्धादिति तत्रानुवृत्तेः प्रस्योत्तर उदीच्यग्रा
मलक्षणस्याञोपवादः पालद इति पलदीति ईकारांत इत्येके नांत इत्यन्ये न लोपे सति यण
देशात्संहितात्तस्यैव वाहीकशब्दः कोपधो पिपलघादिषु पठ्यते परं छं बाधितुं अन्यथा
ग्राणं बाधित्वा परत्वात् छ एव स्यात् कोपधप्रयुक्तोऽण् अवृत्त असाववकाश इति पल्लो लोम
निमवो पाल्लो लोमः श्रान्नीति प्रकृतिभावस्तु नगणेऽस्मिन्न लोपानिपातनादिति हरदत्ता
दयः सौतंगमेयिति सुतंगमादिभ्य श्चातुरर्थिक इञ् शास्त्रीपमिति नन्वपत्याधिका
रादन्यत्र लौकिकं गोत्रं ग्रहस्यत इति चेदत्राहुः सर्वसूत्रे गोत्रग्रहणे न पौत्रप्रभृति गोत्रं ग्र
स्यते कण्वादिभ्यो गोत्रे यः प्रत्ययो विहितस्तदंतेभ्य इति गोत्रप्रत्ययानुवादे मतत्राणिव

त्वान्नसिः मुखतीयमिति मुखेजातमित्याद्यर्थेतसंगतात्वछः अल्लोपोंत्यस्येतितस्यसकारस्यलो
पेढःस्येतिचतयकारलोपः कुज्जनस्येति इहमपिगणसूत्रं स्वकीयमितिस्वार्थिककन्
तात्स्वशब्दाज्जह्लादेश्छ इतिगणात्वछः देशवाचित्वाभावेपिपूर्वपक्षादिवद्बोध्यः अ
तएवलुक्योगाप्रख्यानादितिसूत्रेनहिस्वकीयस्येव प्रत्याख्यानमिति न्यासकारोक्तेः
सूं गृह्णतेवलात्स्वशब्दाद्गणोवसौवंद्वारा दीनांचेत्येच स्वीयमित्यत्रतुप्राक्क्री
ताच्छः अंतरशब्दात्तुगहादित्वाच्छेत ह्तेनशब्दस्यसमासेस्वार्थेकान्नेिचनान्तरीयक
मितिभवति अप्राचिनामग्र तामित्यर्थः वृद्धाट्ठकेकांतवात्खणकीयइतिकोप धा
दणीत्यण प्राप्तः आपोमुखीयामिति वाहीकग्रामलक्षणौठञ्ञिठावित्प्राप्तौ ठञ्ञि
ठादेर्यीति आदिशब्देनरोपधेतोर्देत्यादिनाप्राप्तस्यवुञः पर्वतीयइति तत्रचोरंरचो
र्जेन्य पार्वतीयेर्गणोरभूदित्यत्रतुपार्वतीयस्यराज्ञइमे इत्यर्थे छांतादण् ककण्भा
रद्वाजशब्दोत्रदेशवचनः सचनप्रत्ययार्थः किंतुप्रकृत्यर्थविशे षणमित्याहभारद्वाज
देशेत्यादिना युष्मदस्मदोः त्यदादीनिचेति वृद्धत्वान्नित्येछेप्राप्तेखञणोरपिविधा

त्तरेणेति रोपधत्वादिति भावः जनपदस्सचासौऽवधिश्चेति कर्मधारयाज्जनपदरूपएवाव
धिर्लभ्यते नचजनपदत्वादेवासिद्धेरवधिग्रहणंव्यर्थं वुञेव यथास्यात् ञान्यादित्येतदर्थं
तस्यावश्यकत्वात् अतएवजनपदावधिवाचिनास्त्रिगर्त्तशब्दाञ् तेत्तरपदादिति छो
नभवतिकिंतु अवृद्धादपिबहुवचनविषयादित्युत्तरसूत्रेणवुञेव भवतीत्याशयेनोदाहरति
नागरराजन्यासत्यणइति कृत्यादिषु नागरिष्यतीति संज्ञाशब्दसाहचर्यात्संज्ञाभूतनगरशब्दस्ये
७६ वठुकगानागरेयकइतिभाष्यमितिभावः विभाषाकुरुकुरुशब्दः कच्छादिषुपठ्यते तस्मा
मनुष्योत्पत्तेणसिद्धइतिपरिशेषाद्विभाषाग्रहणंयुगंधरार्थमेव अवृद्धादपीति नित्यप्रा
प्तेवुञनेनविकल्प्यते मनुष्यतत्स्थयोस्तुपरत्वान्नित्यएववुञ् कौरवकोमनुष्यः कौ
रवमस्यहसितं एतदर्थमेवास्यकच्छादौपाठः अन्यथायुगंधरार्थं पिविभाषयावुञणोःसि
द्धौतेनेतिभावः नैंचवाइतिंडोर्यशोइति ठञ्प्राप्तः वुञ्सिद्धः इतिमनुष्यतत्स्थयोरित्यपे
नेत्यु गर्त्तादि भ्यश्चएभ्योदेशवाचिभ्यश्छः स्यात् पूर्वपदात्दिशब्देभ्यस्तुदेशवाचित्वा
भावेपिपाठसामर्थ्याच्छः मुखपार्श्वतसोरितिगणसूत्रेमिदं सप्तम्यंताभ्यामाद्यादि

३५८ रासार्थमित्याहुः असांप्रतिके संप्रतीत्यव्ययं नाप्येव वर्त्तते अनापृष्ठ आतुरा त्रोऽतिरिक्तः यद्भात्रः
सवा एष संप्रतिपत्तोऽपत्यं च रात्रइत्यत्र तपाद्दनात् नन्यूनो नातिरिक्तः स्समइत्यर्थः इदा
नीमित्यर्थेतु प्रसिद्धमेव एतर्हि संप्रतीदानीमित्यमरात् ततः प्रज्ञादित्वात्स्वार्थेऽणा विन
यादित्वात्स्वार्थेऽक्रापि तेन सांप्रतं सांप्रतीकामितिपर्यायो उत्कर्षेत्यादिन्याप्येविद्यमान एव
संप्रतिशब्दोऽत्रगृह्यते इतिभावः द्वीपादनुसमुद्रं समयाम्ननुसमुद्रं अनुर्यत्समयेत्यव्ययी
भावः सप्तम्यंतं चेदं विद्यमानाक्रियाद्वाराद्द्वीपविशेषणमित्याशयेनाह समुद्रसमीपे
योद्वीपइति कछाद्यणोमनुष्यवुञ आपवादोयं अनुसमुद्रं किं द्वैपमन्यत् द्वैपकोमनु
ष्यः द्वैप्यातिपत्रऋतीडीव्रमचाति अपत्याधिकारस्यादेच यञोडीविति प्राग्दिवो क्तत्वा
३४ दे कालाट्ठञ्स्वरूपस्यैनग्रहणं संधिवेलादिसूत्रेण संधिवेलात्रयोदशीचतुर्दशी
प्रभृतिभ्योऽवद्योभ्योपिठञ्बाधनार्थमगृविधानात् किंतु सर्वेषामपि कालवाचिनां ग्र
हणमित्याशयेनाह कालवाचिभ्यइति यत्तु स्वरूपस्यपर्याणं चनग्रहणमितिपद सा१
मंजर्यादिषुस्थितं तन्नदसत् कालिकः संबंधः कालिकीव्याप्तिरित्यादिप्रयोगानापत्तेः ३५८

नार्थमिदं पदद्वयं ग्रहणीति अन्यतरस्यांग्रहणादिति भावः तयोश्चैतेत्रयः प्रत्ययाः इति वैषम्याद्य
थासंख्यं न भवतीति केचित् मनोरमायां तु यथासंख्यनिवारणाय योगविभागः कृतः त
थाहि युष्मदस्मदोरन्यतरस्याम् आभ्यां ङ्भोवास्यात् त्वाहादीनि चेति च आत्वान्नित्ये ङे
प्राप्ते विकल्पो यं ततः खञ् च एवमुत्तरसूत्रेपि योगविभागो बोध्यः तेन अण्आदेशयोः खञणः
भ्यां यथासंख्यं नेत्यादि युवयोरित्यादि एकवचने तवकममकादेशविधानादेकवच
नांते न विहितग्रहो त्र न कृतः तस्मिन्नणि च तस्मिन्निति साक्षादविहितः खञ् निर्दि
ष्टपतेन तु चानुकृष्टः निमित्तयोरादेशौ प्रति यथासंख्यं न भवति खञणोरिति वक्तु
त्वोपयविभक्तिनिर्देशसामर्थ्यात् स्यान्नादेशयोस्तु इष्यत एव हेतुः तावक इह पूर्व
वदेव निमित्तयोः खञणोरादेशौ प्रति यथासंख्यं न भवति किंतु स्यान्नादेशयोरेवेत्या
शयेनोदाहरति तावकीनः मामकीनः इति परावरपरावराधमोत्तमेभ्य इत्येव वक्त
व्ये पूर्वग्रहणं पूर्वविप्रतिषेधसूचनार्थं तेन दिक्शब्दयोः परावरयोः अर्धशब्देन समा
से उत्तरसूत्रप्राप्तावपि ठञ्प्रत्ययौ बाधित्वा यदेव भवति दिक्पूर्वपदग्रहणं स्वरूपविधिनि

३४९ भंगे न तु किं हि क्रियमाणे त्विसुसुक्तांतादिति कादेशप्रसंग इति चेत्सत्यं बुञ्छणादिषु ठच्छित्वे नैका
देशोंतरंगेभ्योऽवलवानिति ज्ञापितत्वात् अन्यथा प्रत्ययात्पुरान्तत्वे कृते इकादेशः स्यादिति किं
ठचः छित्वेन कृते त्विकादेशे प्रत्ययस्वरबाधनायाचित्त्वं युज्यते इति मनोरमायां स्थितम्
संधिवेलाग्रहणे ग्रहणं तु छ्वाधनार्थं अन्यथा संधिवेलादिभ्यो यथाविहिते प्रत्यया स्युरि
त्युक्ते पौर्णमासीशब्दाद्द्वयाच्छः स्यात् वचनं तु ठञो बाधनाय स्यादिति भावः तैषमिति तिष्या
द्धवादावणा जातार्थे तु श्रविष्ठाफल्गुनीति लुक् ... इति ... त्यजति ... योने ... त्राली
ति स्वचनात्सलोपः प्राक्वत्सरेण्यः ऋत्वणोऽपवादः प्रावृषष्ठप् इति प्रावृट नाहि वृतीति दीर्घः त
त्र भवः जाते तु ठप् वक्ष्यति ... सिद्धप्रक्रियालाघवार्थं णकारो ... किंच
प्रावृषेण्यमाचष्टाणः प्रावृषेणीत्यत्र णकारश्रवणार्थमपि तत् एवं तर्हि किं पिटिलोप
णिलोपयलोपाः सर्वत्राण्च हेमंतादिति एतच्च हेमंताच्चेत्यतोऽनुवृत्तमिति भावः हैम
नमिति अकारविशिष्टस्य तशब्दस्य लोपे ... इति प्रकृतिभावान्नस्तद्धिते इति टिलोपो
न तकारस्यैव लोप इति पक्षे तु यस्येति चेत्यलोपस्याभीयत्वेनासिद्धत्वात् स्यादिवृद्धौ
वाद्धा टिलोपोऽन्वेति बोध्यः हैमंतमिति अत्वणि तकारलोपो न भवति तस्य सर्वत्रेति प्रति ३४९

नच विशेषणमेवाग्रहणे संधिवेलादिसूत्रेण संधिवेलादिभ्योऽण् विधानं ज्ञापकमिति वाच्यम् तस्य
स्वरूपमात्रग्रहणनिरासकत्वेनापि साफल्यात् गौणमुख्यन्यायस्त्विनाश्रीयते तेन कदंबपुष्पसा
हचर्यात्कदंबपुष्पः कालः व्रीहिपलालसाहचर्यात् व्रीहिपलालः कालः तत्र भवे कादंबपुष्पिकं
व्रैहिपलालिकमित्याकरः अत्राहि प्रमाणे संधिवेलादि सूत्रे अनेन कालग्रहणेन नक्षत्राणां वि
शेषणमेवेत्याहुः नच पुष्यादिशब्दानां कालो मुख्य एवार्थः लुब्विशेष इति व्युत्पादनात् यच्च
कालविशेषणमुक्तार्थेन प्रमाणमिति वाच्यम् पुष्यादिसमीपस्थचंद्रमसा युक्ते काले पुष्यादिश
ब्दानां गौणत्वात् लुब्विशेष इति शास्त्रमपि गौणवृत्तित्वाद्व्याख्यापकमेवेति दिक् एवं स्थिते का
लवाचिभ्य इति मूलस्य कालप्रतिपादकेभ्य इति फलितोर्थः प्राक्श्रितमिति मन्वाक्षेपमाणपि त्रं
कर्मेत्यर्थः प्रज्ञाश्रद्धार्चाभ्यो ण इति मत्वर्थीयेन व्युत्पादितत्वश्रद्धावान् पुरुषस्तु न गृह्यते अन
भिधानात् अस्तत्पुरुषविभाषेत्यनुवर्तनादाह ठञ्वा स्यादिति एषमो ह्यस इत्यादिनात्यबपि वि
कल्पे न विहितः आभ्यां मुक्ते युघुला वपि स एव प्रौवासिकमिति तन्नांतरंगत्वात् तुट् ठस
प्रत्ययादित्वाभावात् कर्मठ इत्यत्र ठचइवेकादेशो न स्यात् नच परत्वादिकादेशे तस्य तुडिति
वाच्यं आदेशात् प्रागेवांतरंगत्वात् तुटः प्रवृत्तेः इकादेशस्य त्वांगत्वे न बहिरंगत्वात् सूत्र

३५०
न मांतत्तानिपात्यतइतिभावः अत्रवदंति स्वरादौपाठादव्ययत्वादेवसिद्धे सूत्रेचिरमेतदर्थं न
चादंताच्चिरशब्दात् कुन्स्यादितिवाच्यम् तेननवाचयादौजि एवंतत्वमितिप्रागाहुः सोढोस्यप्रा
हे तनइत्याद्यर्थेतत्राहि सप्तमीनास्तिजातार्थेयकालतनेच्छित्यलुकापिसिद्धम् चिर
त्नमिति सूत्रेचिरशब्दस्योपादानात् ट्युट्युलावपिस्तः नचैवंसूत्रेचिरशब्दस्यप्र
त्याख्यानेनसंभवतीतिवाच्यम् मांताव्ययादेवट्युट्यु लिघौ तत्संभवात् परुत
पूर्वस्मिन्वत्सरेपरारिपूर्वतरे अग्रादादिडिमचोडित्व सप्तम्यर्थेतत्रजातः ननुश्रोव
ऽत्यस्यलक्षणत्वोक्तेश्रोत्रग्राह्यरूपं श्रावणः शब्दः इत्यादाविवजातादिष्वर्थेष्वणादयः
सिद्धाः अधिकाराच्चघादयोपिनचजातादिष्वेवाणादयइति नियमार्थंजाताद्यर्थानि
र्देशाश्रावस्यकः अन्यथातत्रास्तेतत्रशेतेइत्याद्यर्थेपिप्रत्ययःस्यादितिवाच्यं चाक्षुषमित्या
द्यसिध्यापत्तेः सुघ्नेश्रास्तेसुघ्नेशेतेइत्यादौत्वनभिधानादेवतद्धितोनभविष्यति अंगु
ल्यास्वनतिरथ्यात्मलादागतइत्यादौपथाप्यसमर्थविभक्तयस्त्वादौपादेवनस्यंतेचाक्षुष
मित्यत्रतत्रीपायपातस्मात्तत्रजातइत्याद्यर्थनिर्देशोव्यर्थइतीचेन्नैवं शब्दवषट्चवित्या

३५

पदोक्तेनाण्सान्नियोगशिष्टत्वात् एतच्च प्रत्याख्यातं भाष्ये तथाहि हेमंतपर्यायो हेमन्शब्दः
प्रसिद्धो हेमन्नागमिष्यतीति कण्वादित्यादिप्रयोगात् ततश्च हेमन् हेमंतशब्दात्स्वार्थेऽत्वाणि हैमनं
हैमंतमिति रूपद्वयं सिद्धं छंदसि तु हैमंतान्नेति ठञा हैमांतिकामिति तृतीयमपि रूपं सिध्यति न
चाविशेषविहितेन ठञाऽण्बाधः शंक्यः छंदसि सर्वेषां विधीनां वैकल्पिकत्वात् वृत्तिकृता
तु हेमंताच्चेति सूत्रे सर्वत्रग्रहणमपनीय लोकेपि हैम[illegible]तिकमिति स्वीकृतं सायंचिरंनन्वं
नरंगत्वात्तु यमंतुट्युट्युलौ तुरित्यादाविव तु शब्दस्य प्रत्ययपरतयांगसंज्ञानिमित्तं पुस्तस्य विधी
यमानोऽनादेशोमनस्यात् नचैवं तु गेवाक्लिप्यमानमिति वाच्यं तस्य पूर्वांतत्वेनाविसर्गाभावा
त्पात तस्य[illegible] नमित्यत्र सत्वाभावप्रसंगात् अत एवाह तुटः प्राग्णीति इत्यादीति स्यादिशब्देन घ
कालतनेष्विति ग्राह्यं सायंतनमिति स्यतेर्घञि सायशब्दोऽकारान्तो दिवसावसाने रूढस्त
स्य प्रत्ययसन्नियोगेन मांतत्वं निपात्यत इति वार्त्तिककृन्मतं भाष्यकृता तु मांताव्ययामित्यात्रि
तस्याग्रहणं प्रत्याख्यातं नचैवं सायशब्दात्कालाट्ठञि अनिष्टरूपप्रसंगः तस्य काल
वाचित्वाभावादनभिधानाद्वेत्याहुः [illegible] चिरंतनमिति चिरशब्दस्यापि प्रत्ययसन्नियोगे

३ ३५१ तत्पर्यंतमनुवर्त्तयंतीति तन्मते असंज्ञायांप पाप यं अणादयो बादपञ्च वोध्याः अमावास्यायावा संधि
वेलाद्यणोऽपवादः अमावस्याद्न्यतरस्यामिति सूत्रेणमापूर्वाद्वसेण्यति व ह्लोपदेश्ह्रस्वत्वं नि
स्त्वोद्दृत्तावोधः हः समीपो लकार इत्त हल्सू पांत्स्यं चेत्ति केयटोक्त व्याख्यायां तु हलितिसं
ज्ञं भवति हल्‌ स चिदित्ति वदेदित्युक्तं नचैवमपि न विभक्तावित्तिविभक्तिपदवोध्य
सुप्तिङ्‌वोधे हलन्त्यमित्तिवाक्यार्थवोधोत्तरं तद्बाधप्रापवादवाक्यार्थवोधोत्तरमित्यन्यो
न्याश्रयत्वादवस्थ एवेति चेन्न ० अपवादवाक्यार्थवोधोत्पूर्वं पस्पदार्थोपस्थित्तावुत्सर्गवाक्या
र्थवोधे प्रतिवंधकाभावात् नच भानज्ञाने प्रतियोगिज्ञानस्येव प्रतियोगिज्ञानेऽभावज्ञान
स्य कारणत्ताकल्पयापि सम्मत्ता प्रतियोगिज्ञानं विना निषेधस्याप्यसंभवाच्च ० पूर्वेच्चपवाद
अभिनिविष्टात्तेपश्चाद्वुत्सर्गादृत्यस्यत्वपंभावः लक्षणैकचक्षुष्कस्यादेशपत्तावच्छेदका
वच्छिन्नेसर्वत्रोत्सर्गकृत्तसंस्कारोद्बुद्धावुत्सर्गापवादयोर्विषयव्यवस्थानापत्त्यामुक्तवंतंप्रति

३ र्वाक्यार्थवोधोत्तरमित्यऽन्योन्याश्रयत्वादवस्थ एवे [illegible] अपवादवाक्यार्थवोधात्पूर्वंप: पदार्थोपस्थित्तावुत्सर्गा

37 ५

मामुंक्षाइतिवाक्यस्यैवापवादशास्त्रवैयर्थ्यं ॥ पूर्वमपवादशास्त्रपर्यालोचनेन तद्विषयलक्ष्यसंस्कारं निर्णीय तदविषयं तत्तल्लक्ष्यं तत्तद्विषयवाक्योपप्लवहारोत्सर्गेण संस्कार्यमिति अन्यथा विकल्पापत्तिरिति ॥ यद्यपि मुक्तवत्तप्रतीतिन्यायोपि नाजातनिवृत्तेर्व्यभिचरितत्तथापि तत्राप्यनुत्पत्तिरेवेति न दोषः ॥ न्यायानंगीकारेपि विकल्पापत्तेः सत्वाच्च ॥ अभिनिविष्टं तदित्यस्य बुध्यारूढा भवंतीत्यर्थः ॥ ल[illegible]त्से कचक्षुष्कस्तु तत्तच्छास्त्रपर्यालोचनेन विनापि अपवादविषयेषूत्सर्गेण लक्ष्यसंस्कारं जानीते तस्यापि शास्त्रप्रक्रियास्मरणपूर्वकं प्रयोग एव धर्मोत्पत्तेः ॥ तदुक्तं कल्प्यं चापवादविषयमुत्सर्गः प्रवर्तते इति प्रकल्प्य परित्यज्य ॥ यत्तु प्रकल्प्य चेत्यस्यायमर्थः यथा न संप्रसारणे इति वचनात् परस्य परणः पूर्वसंप्रसारणं पूर्वस्य तु तन्निमित्तः प्रतिषेध इति अभ्यस्तसंज्ञासूत्रे कैयट स्तन्न ॥ न संप्रसारणे इति सूत्रस्य भाष्यविरोधात् ॥ तत्र हि एतदेव ज्ञापयति परस्य न पूर्वस्येति ॥ पद्य संप्रसारणाश्रयस्य प्रतिषेधइत्याद्युक्तम् ॥ न हि न्यायेन सिद्धे एवमुक्तिः उचिता तस्मान्न्यायस्य मदुक्त एव विषय इति बोध्यम् ॥ यद्यपवादवाक्यार्थं विनानोत्सर्गवाक्यार्थ इति तदर्थस्तत्र हि न उक्तयुक्तेः ॥ न विभक्तौ तुस्मा इति शास्त्रपदार्थज्ञानमात्रेणयादीनामेतद्विषयत्वाभावबुध्या तेषु हलंत्य ४

५२

३४

दित्त्वतिपरस्मिन्प्रत्यये सास्येयोनौग...वाति विलंबंच प्राकृते पिप्रवंचे सपत्दिपदमुद्दीतं केवलः प्र
त्ययोपात् तादिपदितिमिमीते कोहृदायंडितोपि वैवैयाकरणानामौपानिष्ठदानांच प्राक्रियामाश्रि
त्य प्रवृत्तोऽयं ग्रन्थोऽयं श्लोकः किमः संख्यानट सोत्यनुवर्त्तत एवं संख्याः परिमाणं परिछेदस्तास्मिन्कि
त्तेर्थेदः प्रश्नस्तास्मिन्वर्त्तमानात्किमः प्रथमासमर्थाद्दस्येति षष्ठ्यर्थे डतिः स्यात् संख्यापरिमाणे किं
क्षेयेमाभूत् कासंख्येयमेषां दशानांम्प्रमानामसंज्ञानांजातिमात्रोपजीविनां सहस्रशः
समेतानांपरिवृत्वेनाविद्यते इत्येवं संख्येद्धारेण प्रसंख्यायाः कुत्सावोध्यासंख्यापात्प्रवय
वे ग्रवयवे वर्त्तमानां यासंख्यातद्वाचिनः प्रथमांत्यर्थेतप एस्याद्यंप्रतिज्ञ अवयस्योऽवय
वीप्रत्ययार्थः स्यज्ञस्येत्यधिकारात्त्यपाद्वयसजादिषु प्रमाणे प्रकृत्यर्थे प्रथमेयं प्रत्य
यार्थस्तद्वत् त्रयामितिननुत्रयोऽवयवास्तंतवोयस्यत्रयंपटः शत्रयामिति प्रयोगे संभवत्यपि
मुनित्रयमिति प्रयोगेन संगच्छते अन्यपदार्थस्याऽवयववाचिनोऽभावादिति चेत् स्वबाह्रुः

अवयवीत्यत्र समुदाय एव स चातिरिक्तो वाऽनतिरिक्तो वेति विचारांतरं एवं च समुदायस्यातिरिक्तत्वप
क्षेऽपि समुदायघटकत्वेन मुनीनां प्रत्यभिज्ञानान्मुनित्रयनमस्कारस्यापि विघ्नविघातकत्वमस्त्येवेति
उभादुदात्तो नित्यं इह चित्त इत्यनेनैवांतोदात्तत्वं सिद्धं सर्वोदात्तत्वं तु अनुदात्तं पदमेकवर्जमिति व
चनाद्बाधितं न चेह उभयेति संबुध्यंतेस्यामंत्रितानुदात्तत्वं बाधितुं वचनमिति शंक्यं पुरस्ताद
पवादन्यायेनाचेत्स्वरस्यैवाबाधनान्न त्वामंत्रितानुदात्तत्वस्येति सुवचत्वात् तस्मादुदात्तत्वव
चनसामर्थ्यादादेरेवायम् प्रत्युत्पत्तेन यथा उभयं स्थ एव वचन इति तदेतत्सकलमभिप्रेत्याह
सचेति तदास्मिन्पुनस्सद्ग्रहणमस्येति बहुव्रीहिसंबंधसद्ग्रहणानिरासार्थं प्रत्ययविधौ तदंतविधे
रभावान्न बहुदशांतादिति अंतग्रहणं किं दशस्याधिकारास्मिन् शते न चेह व्यपदेशिवद्भावेन
दशांतत्वमस्तीति वाच्यं व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यभ्युपगमात् अदंतप्रत्ययग्रहणपरि
भाषाबाधात्तदंतविधौ सत्यपि यस्मात्प्रत्ययविधिस्तदादेस्तदंतस्येति परिभाषाबाधनार्थादिति पञ्चमः सा

नि॥ ॥ अजाद्यतः अजशब्द आदिर्यस्येति बहुव्रीहिः अत् च आदिर्यस्येति तु नार्थः अचीति नि-
र्देशात् गणपाठसामर्थ्याच्च अदित्यपि न स्वरूपग्रहणं संख्यायाः इति लिंगात् अजादिभ्यः पृथ-
कारि३ क्पाठसामर्थ्याच्च इह आप् प्रातिपदिकादित्यधिकारेपि आपो न संबध्यते इहैव तयोर्विधेयत्वा-
त् अपि तु प्रातिपदिकमेव तच्चाकारेण विशिष्यते विशेषणेन च तदंतत्वलाभः तदाह अजादीना-
मकारांतस्य चेति सूत्रे आत् अपि तु प्रातिपदिकमेव तच्चाकारेण विशिष्यते॥ इति षष्ठीतदर्थश्च
वाच्यवाचकभावः स्त्रियामिति तु धर्मप्रधानो निर्देशः इत्याशयेनाह वाच्यं यत्स्त्रीत्वमिति एत-
च्च लिंगं प्रातिपदिकार्थ इति पक्षाभिप्रायेणोक्तं कस्माद्भवतीत्याकांक्षायां सन्निधानादजादि-
भ्योऽकारांताच्चेति बोध्यं इको यणचीत्यत्र कस्मादचि पर इत्याकांक्षायामिक इति यथा टापः
टकारः स्वरार्थः औङ आपः आङि चापः याडापः इत्यादौ सामान्यग्रहणार्थश्च तदविघातार्थ-
पकारः आविन्मुक्तेर्हि तदनुबंधपरिभाषया औङ आप इत्यादावपमेव गृह्येत डाप्चापोस्तु

२०९ ग्रहणं न स्यात् नन्वेतदित्येव सिद्धेऽजादिग्रहणं व्यर्थं न च क्रुंचाऽऽदिभिन्नेहेत्यादिषु हलंतत्वादप्राप्तेर्वि
धानार्थं तदिति वाच्यम् तथा हि सति क्रुंचेत्यादिरेव णः स्यात् न त्वजादिरितो व्याचष्टे अजाद्युक्तिर्ङीषो
ङीपश्चेति खट्वेति खट्वा अशूप्रुषिलटिखटिकणिविशिभ्यः क्वन् नन्व चेतनानां ख
ट्वादिशब्दानां कथं लिंगव्यवस्थेति चेत् उच्यते लोकप्रसिद्धं स्तनाद्यवयवसंस्थानविशेषात्म
कं लिंगं न व्याकरणेनाश्रीयते पराणि नित्यादौ तत्त्वाभावप्रसंगात् तत्र तटस्तटी तटमित्यादौ यथायथं
लिंगत्रितयनिबंधनकार्याणामसिद्धिप्रसंगाच्च किन्तु पारिभाषिकमेव लिंगत्रयं तच्च केवलान्व
यित्रयपर्यायं व्यक्तिरिदं वस्त्विति शब्दानां सर्वत्राप्रतिबद्धप्रसरत्वात् तत्र कश्चिच्छब्द एक
स्मिंल्लिंगे शक्तः कश्चिद्द्वयोः कश्चित्त्रिष्विति लिंगानुशासनादिभ्यो निर्णेयं कुमारब्राह्मणा
दिशब्दास्तु लौकिकपुंस्त्वविशिष्टे शास्त्रीये पुंस्त्वे शक्ताः लौकिकस्त्रीत्वविशिष्टे च शास्त्री
ये स्त्रीत्वे कथमन्यथा कुमारी कुमार इत्यादयः प्रयोगाः प्रवर्तिष्येरन् करेणुरिभ्यां स्त्री

तृतीयया पुंस्त्वमेकत्वं च ज्ञाप्यते १

नेमे. इत्यमरस्याप्ययमेवार्थः नन्वेवं पशुनेति पुंस्त्वं विवक्षितमिति मीमांसकोद्घोषः कथंपो।
ज्यः पारिभाषिकस्याव्यावर्त्तकतया तद्विवक्षाया अकिंचित्करत्वात् लौकिकस्य तु लिंगस्य पशुश्राव्या
दप्रतीतेरिति चेत् अत्राहुः छागो वा मंत्रवर्णादिति षष्ठ्यांत्यधिकरणन्यायेन पुंस्त्वस्य नियमो बो
ध्यः छागशब्दस्य लौकिकपुंस्त्वविशिष्टपारिभाषिके शक्तत्वादिति तच्च जातित्वमित्येके
उक्तं च हरिणा तिस्रो जातय एवैताः केषांचित्समवस्थिताः अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभिः
भाष्ये तु प्रकारान्तरमुक्तं संस्त्यानप्रसवौ लिंगमास्थेयौ स्वकृतान्ततः संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः
सप् प्रसवे पुमान् उभयोरंतरं यच्च तदभावे नपुंसकमिति अस्यायमर्थः संस्त्यानं स्त्री सत्वरजस्त
मोलक्षणानां गुणानामपचयः प्रसवो गुणानामुपचयः सप्पुमान् सूतेर्धातोः सप् सकारस्य
पकारादेश इत्यर्थः औणादिकोयं मस्तुन् प्रत्ययो ह्रस्वश्च बाहुलकादिति कैयटः पूङो डुमसुन्नि
तिमाधवः तयोरुपचयापचययोरभावे सति यदुभयोरंतरं सादृश्यं तन्नपुंसकं नभ्राण्नपादिति १३
निपातनादिति भावः तथा च स्थितिमात्रेण नपुंसकं अत एवाविर्भावतिरोभावयोरपि स्थितिसा
मान्यविवक्षासंभवान्नपुंसकलिंगं सर्वनामेति सिद्धांतः स्त्रीपुमान्नपुंसकमिति शब्दं अमु

२१० क्वादिशब्दवद्धर्मे धर्मिणि च वर्त्तते स्वरूतां तत इति वैयाकरणसिद्धांत इत्यर्थः कृतांतौ यमसिद्धां
तावित्यमरः पंचाजीति पंचानामजानां समाहार इति तद्धितार्थेत्यादिना द्विगुः अकारांतोत्तरप
द इति स्त्रीत्वे द्विगोरिति ङीप् न चात्र प्रत्ययविधौ तदंतविधिविरहादेव टापो प्रवृत्तौ ङीवेवस्या
दिति वाच्यम् अमहत्पूर्वग्रहणेनानुपसर्जनाधिकारेण च स्त्रीप्रत्ययेषु तदंतविधिज्ञा
पनात् टाप् प्राप्तेः सत्वात् समासार्थसमाहारनिष्ठमिति नन्वजत्वस्यापि टाज्ञौ समा
हारोप्यजार्थ एवेति चेत् मैवं तथापि तस्य पदांतरसमभिव्याहारापेक्षत्वाद्बहिरंगत्वात् टाबि
धेस्त्वंतरंगे चरितार्थत्वात् कथं तर्हि परमाजेति चेत् प्रागुत्पन्नस्यैव टापस्तत्र श्रवणात् अत्यजा
निरजेत्यत्र तु अदंतप्रयुक्तः टाबित्यवेहि न च पंचाजीत्यत्रापि तथास्त्विति वाच्यम् द्विगोरिति ङीपा
बाधितत्वात् चटकेति न चात्र प्रत्ययस्थादिति इकारः शंक्यः चटकाया ऐरगिति लिंगादिहैव नि
पातनात्तदप्रवृत्तेः एवं च द्विपकादिषु चटकेति पठनं नातीवावश्यकमिति नव्याः मूषिकेति
वृश्चिकयोः किकन्नित्यधिकारे मुषेर्दीर्घश्चेति किकनि इकारमध्यो मूषिकशब्दः यस्तु मूष
सोय इति दीर्घोपधात्संज्ञायां कुनि मूषकशब्दो माधवेनोक्तस्ततोप्ययं टाप् प्रत्ययस्थादिती

त्वं तु विशेषः केचित्तु क्रुञ्चं तो सौत्रजादौ गणे पाठं न प्रयुङ्क्ते गणे तत्पाठस्य जातिलक्षणङीषबाधनार्थत्वात्संज्ञापा
स्याजातित्वात् तथा चाद्यंतत्वादेव क्रुञ्चं ताद्दाप् सिध्यतीत्याहुः तच्चिंत्यं व्याघ्रीत्यादिवत्संज्ञात्वेपि जातित्वान
पायात् भस्त्राफलेति भस्त्रेव फलानि यस्याइतिविग्रहः आपकेरिति एतच्च फलनिष्पत्तावितिधातो
माधवग्रंथे स्थितं पाककर्णेत्यत्र भाष्येतु दीर्घ एव दृश्यते सदच्कांडेति सत्प्राक्कांडेति पाठो नादर्त
व्य इति ध्वनयन्नुदाहरति प्रत्यक्पुष्पीति अत्र नञ्याः संभस्त्रेत्यादिवचनद्वयं मूलान्नञ इति वक्ष्यमाणं
च पाककर्णेत्यनेन प्राप्तस्य ङीषो निषेधार्थं तच्चैव सूत्रे भाष्ये पठितमपि फले विशेषाभावादिहैव
ग्रंथकारैः पठितं न चैतावंत्यजाद्यंतर्गणसूत्राणीति भ्रमः कार्यस्तथात्वे मानाभावात् किंतु वा
र्त्तिकान्येवमानीत्याहुः शूद्राचेति शूद्रशब्दष्टापमुत्पादयति जातिश्चेत् महत्पूर्वस्तु न जातिश्चे
दिती हापि संबध्यते तेन महती शूद्रा महाशूद्रेति भवत्येव पुंयोगेविति पुंयोगश्चेदांपत्यरूपए
वेतिनानियमः किंतु जन्यजनकभावोपि गृह्यते तथा च स्मृतिः वैश्यात्शूद्र्यां सु राजन्यान्मा
हिष्योग्रौ सुतौ स्मृताविति महाशूद्रीति आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः ३

२६१ णामहत्पूर्वेतिव्यर्थंमहाशूद्रशब्दोहिसमुदितएवाभीरत्वजातौवर्त्तते तत्रावयवस्यानर्थकतया
शूद्रशब्दार्थसमवेतस्त्रीत्वाभावेनपापःप्रसक्त्यभावात् नचतदंतविधिज्ञापनायतदितिवा
च्यम् अनुपसर्जनाधिकारेणैवतदंतज्ञानादितिदिक् अत्रनव्याः शूद्राचेत्यादिवचनमजा
द्यतइतिसूत्रस्थंवार्त्तिकमेवनत्विदंगणेसूत्रमित्याहुः क्रुंचेत्यादित्रयोऽमीहलंताइत्येकेभा
ष्येतुक्रुंचानालभेत उष्णिहककुभावित्यादिप्रयोगमुदाहृत्यादंताअपिस्वीकृताः पचाद्यचा वा इ
च गुपधलक्षणेनकप्रत्ययेनैवयथासंभवमदंतत्वात् पुंयोगेपीतिपदाज्येष्ठादयः प्रथमजातादौ
वर्त्तंते तदाअदंतत्वादेवटाप्सिद्धः यदातुज्येष्ठस्यस्त्रीत्यादिविवक्षा तदापुंयोगलक्षणोङी
पप्राप्तःसोऽनेनबाध्यतइतिसूचयितुमपिशब्दः मूलान्नञः नञःकिं शतमूली अमूलेति
ज्ञौषधिजातिरियं उगितश्च ङीप्छब्देनप्रातिपदिकंविशेष्यतेविशेषणेनतदंतविधिः
नचप्रत्ययविधौप्रतिषेधःशंक्यः अनुपसर्जनादित्यनेनस्त्रीप्रत्ययेषुतदंतविधिरस्तीति
ज्ञापनादुगिद्वर्णग्रहणवर्जमिति येनविधिरितिसूत्रएवोक्तेश्चेत्याशयेनाह उगिदंताद्

त्वा १

ति तत्रोगित्प्रातिपदिकं प्रत्ययश्चेति द्विविधं संभवति आद्ये उगिदंते भवंतं महांतं चातिक्रांता अतिभवती
अतिमहती इत्युदाहरणं सर्वादिगणे भवतु इति पाठाद्भवच्छब्दस्योगित्वव्यपदेशः महच्छब्दस्य तु शतृवद्भा
वात् न चैवं व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधात्केवलाभ्यां भवन्महच्छब्दाभ्यां ङीप् न स्यादिति
वाच्यं प्रातिपदिकाप्रातिपदिकसाधारणेन शब्दमात्रमुगित्यभिधेयमिति उक्तनिषेधाप्रवृत्तेरित्याश
दा येनोदाहरति भवंती इति द्वितीयमुगिदंतमुदाहरति पचंती इति पचेर्लटः शतरि कर्त्तरि शप् यदि तु सर्वा
दिगणे भवतु इति उगित् पठितः स भातेर्डवतुरिति व्युत्पाद्यते तदा भवतीति द्वितीयोगिदंतस्याप्युदाहर
णं भवत्येव शत्रंतात्तु भवतेः ङीपि शप्श्यनोर्नित्यमिति नित्यो नुम् भवंती उखास्रदित्यादि उखायाः स्रंसते प
र्णेभ्यो ध्वंसते स्रंसु ध्वंसु अवस्रंसने वसुस्रंस्विति दत्वं वनोर च वनिति प्रत्यये नतदंतं प्रातिपदिकं तस्य
त्यत्र स्वं रूपमिति सूत्रात्स्वमित्यपकृष्यते वन्नंते नत्वाधिकृत प्रातिपदिकविशेषणात्तदंतविधिरित्या
शयेनाह वन्नंतात्तदंताच्चेति येन विधिस्तदंतस्येत्यत्र स्वंरूपमिति सूत्रात्स्वमित्यनुवर्त्य चेति स्वस्य
चेति व्याख्यानादुभयं लभ्यते इति भावः यदि तु वन्नंतमेवं व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषे
व्यपदेशिवद्भावेन वन्नंतान्तमित्युच्यते तर्हि येन विधिस्तदमित्यनुवर्त्य स्वस्य चेति

न व्याख्येयं न चात्र १

२१२ धः शंक्यः तस्यप्रत्ययमात्रविधिविषयत्वात्वन्नंतस्यवस्तुतः प्रातिपदिकत्वेपि सूत्रेगृहीतस्यवन इत्यस्यप्रा
तिपदिकत्वाभावाच्चेत्याहुः सामान्यग्रहणमिति सूत्रेवन इत्यनुबंधरहितस्यग्रहणात्तदनुबंधपरि
भाषानोपतिष्ठत इतिभावः वनग्रहणेवन्नंतंवन्नंतांतंचकथंलभ्यत इत्याशंकायामाह प्रत्ययग्रहण इ
त्यादितेनेतिवन्नंतेनेत्यर्थः तदंतांतमपिलभ्यत इति स्त्रियामित्यधिकारेग्रहणवताप्रातिपदिकेनेति
निषेधोनप्रवर्ततेअमहत्पूर्वेत्यादिज्ञापकादितिभावः अन्येत्वाहुः सूत्रेगृहीतस्यवन इत्यस्यप्रा
तिपदिकेनेतिकत्वंनास्तीतिउक्तत्वात् ग्रहणवतेतिनिषेधशंकैवनास्तीति सुत्वानमिति सुयजोर्ङ्
निप् अत्यादयः क्रांताद्यर्थेइति समासः अतिधीवरीति दधातेरन्येभ्योपिदृश्यंत इति क्वनिप् बहु
मास्येतीत्वंभाष्येतुध्यापतेः क्वनिपिसंप्रसारणमितिस्थितं नस्परेफादेशेकृते येकदेशविकृतस्या
नन्यत्वाद्दल्लोपोन इति प्राप्नोति अनोनकारांतविशेषणात्तुनभवतीति स्वपुवमस्वोनामित्य
त्रैवव्युत्पादितं शार्वरीति स्पृधातोरन्येभ्योपीत्यनेनैववनिपृगुणेकृतेरपरत्वेचहशंतात्परत्वेपि
हशंतादिहितत्वाभावात्ङीब्रयोरत्रानिषेधोन वनोनहश इति अबहुव्रीहावर्थोयमारंभः व

हुप्रज्ञेत्यादौत्वनोवहुव्रीहेरितिङीपिनिषिद्धेरेफस्याप्रवृत्ते: राजयुध्वेति रजानेयोधितवती
राजानंयुधिकृञइतिक्वनिप् वहुव्रीहौ वेति अन्यतरस्यामितियोगविभागादिदं लभ्यते नत्व पूर्व
वचनमितिवक्ष्यते वहुधीवरीति वहवोधीवानोयस्यांनगर्यामितिविग्रह: पद्दोडाविति डा
वुभाभ्यामितिसूत्रेण तयोश्चद्विवचनेवहुधीवर्यौ वहु धीवानौवहुधीवे इति रूपत्रयंभव
तीतिभाव: द्विपादिति द्वौपादौऽस्याइतिवहुव्रीहौ संख्यासुपूर्वस्येतिपादशब्दस्यांतलोप:
ङीपिभत्वात्पाद: पत्पटावृचि पूर्वेणप्राप्तस्यङीपोपवाद: यद्यपिपदंव्यवसि तत्राणस्यान
ति लक्ष्मांघ्रिवस्तुष्विकोशगत पादसमानार्थकपदशब्दोऽस्तीतितेनैव द्विपदाएकपदेतिरूपं
सिध्यतितथापिऋचिवाच्यायांद्विपदीद्विपादितिप्रयोगनिरुक्तयेसूत्रारंभोयमावश्य
क: असिद्धत्वादितिएतच्चासिद्धत्वोपवर्णनंकार्यकालपक्षएवोपयुज्यतेनतुयथोद्दे
शपक्षेसकृत्प्रवृत्ताया: संज्ञाया: सर्वार्थत्वेनतस्या: पुनरपेक्षाभावात् नचपंचान्नीति
नांतस्यकृतायामपिसंज्ञायांपंचेत्यदंतस्यनकृतेति शंक्यं एकदेशाविकृतस्यानन्य

२१३ त्वादित्याहुः तदसत् एकदेशाविकृतस्योपसंख्यानं हि स्थानिवदादेशोनल्विधावित्यत्र
प्रवर्त्ततेतत्राल्विधौनप्रवर्त्ततएवेतिपयोद्देशापत्त्याप्रसिद्धत्ववर्णनस्ययुक्तत्वात् नडीवि
तिपूर्वसूत्रान्नेत्यनुवर्त्ततइतिभावः अनोबहुव्रीहेः ननुराजयुध्वेत्यादिसिद्धयेअवश्य
वक्तव्ये नवनोनहृशाइत्यनेनैवइष्टसिद्धेः किमनेनसूत्रेण मैवंअन्नंताद्बहुव्रीहेर्ङीबुभा
मितिङब्विधानार्थमेवतत्सूत्रस्यावश्यमारब्धव्यत्वात् तथाचानेनङीपिनिषिद्धेत
त्सान्नियोगेनप्राप्तोवनोरचेतियोरेफः सोऽपिदुर्लभएवेतिवनोनहृशइति वार्त्तिकम
बहुव्रीह्यर्थमितिफलितम् बहुपञ्चानाविति नसंयोगादितिनिषेधान्नायमुपधालो
पीतेनात्रअनउपधालोपिनइतिवक्ष्यमाणविकल्पोनप्रवर्त्तते टाबुभाभ्यां उभाभ्यांग्र
हणंव्यर्थमन्नंतान्नंतयोरनुवृत्त्यैवतत्फलसिद्धेरित्येके उभयोरप्यनुवृत्तिसूचनायत
द्ग्रहणमावश्यकमन्यथासन्निहितस्यान्नंतस्यैवानुवृत्तिःस्यादितिशंकास्यादित्यनेननन्विति
येधवयोर्वचनसामर्थ्यात्पर्यायः सिध्यतितत्किमन्यतरस्यांग्रहणेन सत्यं अन्यत

रस्यामीति योगो विभज्यते तत्र मन इतीति निरत्तं अनो बहुव्रीहेर्ङीब्बा स्यात् पूर्वेणैव डापि सि
द्धे पुनर्विधानमिदं अन्नेभ्य इति ङीपा सह विकल्पार्थं अन उपधालोपिन इति सूत्रं तु
नियमार्थं अनो यो सौ विकल्पः स उपधालोपिन एवेति च बहुधीवर्यौ बहुधीवानौ ब
हुधीवे इत्युक्तरूपत्रयं सिद्धमिति बहुव्रीहौ वेत्येतन्न्यापूर्ववचनमिति वा ध्येयं उपधालो
पिन एवेति नियमात् सुपर्वा चारुपर्वा इत्यादावनुपधालोपिनि ङीप् न भवति किं तु डा
प्प्रतिषेधावेव भवतः अयं च योगविभागो ऽवश्यमभ्युपेयः अन्यथा बहुधीवरीत्यत्र प्र
करणान्तरस्थेन अन उपधालोपिन इति वक्ष्यमाणेन पाक्षिके ङीपि कृतेपि अन्नेभ्य इ
ति प्राप्तं ङीपमनूद्य तत्सन्नियोगेनाहिविधीयमानो यो वनो र चेति रेफः स न सिध्येत्
ननु वनो र चेति सूत्रमेव ङीप्रौ विधत्तामिति चेन्न उभयविधौ गौरवात् किं च उभयावि
धायकत्वे अनो बहुव्रीहेरित्यनेन ङीपि निषिद्धे रोपि दुर्लभः संनियोगशिष्टत्वात्
भाष्ये तु अनो बहुव्रीहेरित्यस्यानन्तरं उपधालोपिनो वेति सूत्रमस्तु अन उपधेत्यादि

प्रदेशांतरस्थंसूत्रंडाप्सूत्रेअन्यतरस्यांग्रहणंचमास्त्वित्युक्तंअनउपधावहुव्रीहेःसूत्रस्यसोडीबित्य
तोवहुव्रीहिग्रहणंसंख्याव्ययादेडीवित्यतोडीप्चानुवर्त्ततइत्याशयेनाह अन्नंतादित्यादि नि
यमार्थमिदमित्युक्तं नचैवं पूर्वेणैवविकल्पसिद्धाविहान्यतरस्यांग्रहणंव्यर्थमितिवाच्यं अ
सतिह्यन्यतरस्यांग्रहणेनित्यार्थोविधिरेवायंस्यान्नतुनियमइति प्रत्ययस्थात्कात्पूर्वस्यका प
दित्यकारउच्चारणार्थः व्यंजनमात्रंविवक्षितं अन्यथा एतिकाश्चरंतीत्यादावकचिइत्वं
नस्यात् तत्रहि अप्रकाराविशिष्टककारस्यप्रत्ययस्थत्वाभावात् नचाकच्यप्यकारांतकका
रएवप्रत्ययस्योभवंतु अतोगुणइति पररूपे सत्येनिकाइत्यादिरूपसिद्धेरितिवाच्यम
यचतकीत्यादिवक्ष्यमाणरूपासिद्धिप्रसंगादित्याशयेनाह ककारादितिवर्णे निर्देशे
हिकारप्रत्ययोविहितः क्वचित्समुदायात्प्रयोगस्तुउच्चैस्तरांवावषट्कारइत्यादिनिर्दे
शात्पयत्नसाध्यइतिभावः आपिपरइतिएतच्चाकाराविशेषणंतत्सामर्थ्यात्ककारा
काराभ्यांव्यवायेपिभवति नतुपुत्रकाम्यारथ्यकदेत्यादौत्रिःतुरादिव्यवायेअतएव

सर्विकेत्यादावाद्याकारस्य न भवति तदेतदुक्तमकारस्येकारस्यादावपि परइति यदित्वापीति कका
रविशेषणं स्यात्तर्हि रथकव्येत्यादावतिप्रसंगः व्यवहितस्यापि परत्वानपायात् न च निर्दिष्टप
रिभाषया नि स्तारः अनुवादे परिभाषाणामित्यत्वमनुपस्थिते न चापीत्यस्य अकारविशेषणत्वे
६४ पितदोषतादवस्थ्यमिति वाच्यं अनुवादे परिभाषाणामित्यत्र अनुवाद इत्यस्य अनूद्यमानविशे
षणेष्वित्यर्थाभ्युपगमात् कात्पूर्वस्यात इदित्यत्र हि अत इत्यनूद्येत्वाविधानादनुवाद्यत्वमेवात
इत्यस्य न त्वनूद्यमानविशेषणत्वं कादित्यस्य तु अनूद्यमानविशेषणत्वं स्पष्टमेवेति न तत्र नि
र्दिष्टपरिभाषोपतिष्ठत इति वैषम्यात् अनूद्यमानविशेषणे परिभाषा नोपतिष्ठत इत्येतदुदीचा
मात इति सूत्रस्य स्थानग्रहणेन ज्ञापयिष्यते यद्यसुप इति पर्युदासः स्यात्तर्हि बहुपरिव्राजके
त्यत्रापि स्यादेव उत्तरपदस्य सुबंतत्वेपि समुदायस्यासुबंतत्वात् ततश्चाविति तेनात्र प्रसज्यप्र
तिषेध इत्याह सस्मापसुपः परो न चेदिति सुबंतात्परो न चेदित्यर्थः सर्विकेति अव्ययसर्वना
म्नामित्यज्ञातार्थे अकच् कारिकेति करोतेर्ण्वुल् णित्वाद्वृद्धिः नौकेति नौशब्दात्स्वार्थे

शाकेति शक्नोतेर्विग्रहः ।

२२५

कः यचाद्यच् बहुपरिव्राजकेति परिपूर्वाद्व्रजेर्ण्वुल् बहवः परिव्राजका यस्यामिति बहुव्रीहौ त
दवयवस्य सुपो लुकि कृते पि प्रत्ययलक्षणेनोत्तरपदस्य सुबंतत्वादाप सुबंतात्परत्वमस्ती
तीत्वमत्र न भवति नंदनेति नंदिग्रहेतिल्युः वस्तुतस्तु सूत्रे प्रत्ययस्येकीति सप्तमीनिर्देशमेव
कृत्वा पूर्वस्येति ग्रहणं सुत्यजमित्याहुः पूर्वस्येति किमिति अर्थादेवेदं लभ्यते टावेकादेशे कृते प
२ रत्वात्कुत्वाकोभावादिति प्रश्नः इतरेतो निर्दिष्टपरिभाषयाकात्पूर्वस्येति न लभ्यते किंतु टावेकादेशं बा
धित्वाकात्परस्येवाकारस्य स्यादित्याशयेनाह परस्येत्यादि कटुकेति कटुरवकटुरसवतीग्र
ज्ञाता दौकः राकेति ठिदा धारार्चिकलिभ्यः कः बाहुलकादित्संज्ञाभावः संज्ञापूर्वकोविधे रनि
त्यत्वात्केण इति ह्रस्वो न मामकनरकयोरिति ककारस्य प्रत्ययस्थत्वाभावादप्राप्ते वचनं मा
मिकेति ममेयं मामिका युष्मदस्मदोरन्यतरस्यां खञ्चेत्यण् तवकममकावेकवचन इति म
मकादेशः अचादिवृद्धिः केवलमामकेत्यादिना संज्ञाछंदसोरेवेति नियमान्न ङीप् नारिकेति
केशाद्देऽच्च देचउपदेशाद्दत्वाद्धं आतोनुपसर्गेकः आतोलोपइटि चेत्यालोपः टाप इत्वं त्यक

त्ययोश्च उपसंख्यानमित्यनुसज्यते उदीचामात इति विकल्पापवादः दाक्षिणात्यिकेति दक्षिणस्यामदू
वि रे दाक्षिणादा च दाक्षिणा भवेतिग्रहे दक्षिणापश्चात्पुरसस्त्यकिति चेत्यादि [illegible] वृद्धिः टाप् ततोऽज्ञातार्थे घर
क के एइति ह्रस्वः टाप् [illegible]चात्तु दाक्षिणस्यां दिशि भवेति विगृहीतं तत्त्वमनोरमायां दूषितं त्यौविधौ ऽत्र व्य गर३
यसाद्ध चर्यो दाज्जं तस्यैव दाक्षिणाशब्दस्य ग्रहणात् अन्यथा सर्वनाम्नो वृत्तिमात्रे पुंवद्भावापत्तेश्चेति
इह त्यिकेति अत्र व्यपाश्रय नयासयोः प्रत्ययस्यादिति प्राप्तेन निषेधोऽयं यासेति यत्तदोरुपलक्षणमि
त्याशयेनाह यत्तदोरिति यकासकेति यत्तदोरकच् त्यदाद्यत्वे टाप् स्वरूपस्यापि वक्ष्यमाणफलमाह
यकांतकामिति यद्यपि न यत्तदोरित्येव सूत्रयितुमुचितं तथापि सन्निपातपरिभाषया अनि
त्यत्वज्ञापनार्थं नयासयोरित्युक्तमित्याहुः वस्तुतस्तु यत्तदोरित्युक्तेप्यनित्यत्वं सिध्यत्येव अन्य
२३ था अनयोरकारस्याप्यइत्वं दुर्लभमिति किमनेन निषेधेनेति त्यकनश्च निषेध इति ननु मद्
द्रासिकान्निति वत्प्राक्कियालाववापत्यिकान्निति वक्तव्ये त्यकान्नित्यकारानिर्देशसामर्थ्यादित्वाभा
वे सिद्धे किमनेन न निषेधवचनेन मैवं पंचभिरुपत्यकाभिः क्रीतः पंचोपत्यक इत्यादौ तद्धितलुकि

स्त्रीप्रत्ययस्यापिलुकिअकारस्यश्रवणार्थत्वान्नस्यात्यिकन्निन्मुक्तेद्विपंचोपात्यिकइतिस्यात् इष्यतेतु
पंचोपत्यकइतितस्मादावश्यकमेवानिषेधवचनमदस्तिकन्नित्यत्रापिइकारोच्चारणंतद्धितलुकि
श्रवणार्थंनतुप्रक्रियालाघवार्थंअन्यथापंचभिर्मत्रिकाभिःक्रीतइत्यादौदितिठकोअध्यर्धपूर्वे
तिलुकिकृतेलुकताद्धितलुकीतिटापोलुकिनिमित्ताभावात्प्रत्ययस्यात्कादिति इत्वंनस्यात् पंचमे च
त्रिकइत्यत्रनचलुकः प्रागेवअंतरंगत्वात्प्रत्ययस्यादितीत्वंसिध्यत्येवेति वाच्यम् अंतरंगानपि
विधीन्बहिरंगोलुग्बाधतइतिअभ्युपगमात् अतएवसनीस्त्रंसेइत्यादौनलोपाभावःसिध्यति त६
पंचभिःखट्वाभिःक्रीतःपंचखट्वइत्यादौटापासहएकादेशोपिनभवति अन्यथाएकादेशस्या
दिवद्भावाट्टापग्रहणेनग्रहणाल्लुक तद्धितलुकीत्यनुपसर्जनस्त्रीप्रत्ययस्यलुकिकृतेअका
रस्यश्रवणंनस्यात्एतच्चभाष्यकैयटयोःस्पष्टम् उपत्यकेति उपाधिभ्यांत्यकन्नासन्नारूढ
योःआशिषीतिआशीरर्थेविहितस्यवुन्प्रत्ययस्यातइत्वन्नभवतीतिवक्तव्यमित्यर्थः जीवका
भवकेति जीवतात्भवतादित्यर्थेजीवतिभवतिभ्यामाशिषिचेतिवुन्प्रत्ययस्याकादेशेकृतेटाप् देव

केति देवदत्तशब्दात्स्वार्थिकः कः अनजादौ विभाषा लोपो वक्तव्य इति गाग्रीवीयेषु वत्समा एत्वाद्वि
तीयादचऊर्ध्वस्य दत्तशब्दस्य लोपः देवदत्तिका शब्दस्यो यन्यासस्तु दत्तलोपमभिव्यक्तुं तदभावे
इत्वानिषेधाभावं च दर्शयितुं द्विपकादीनां चेति नेत्यनुषज्यते द्विपकेत्यादि द्विपेरि गुपधलक्ष
णकः एवं ध्रुवस्थैर्ये इत्यस्माद्यिकः पचाद्य ध्रु गतिस्थैर्ययोः पचाद्यच कुटादित्वान्ङीत्वेन गु
णाभावे उवङ् चटकेति चट भेदने पचाद्यचु ततष्टाप् अप्रज्ञातादौ कः केण इति ह्रस्वः पुनश्चापतार
केति तरतेर्ण्वुल् अकादेशः मन्त्रं नेत्रकनीनिका चज्योतिः वर्णकेति प्रावारविशेषः वर्ण वर्णक्रि
याविस्तारवचने इति चौरादिकात् ण्वुल् तंतन्नां विकारस्तांतवं अन्यत्र वर्णिकेति ग्रंथावि
त्री॰ ४ शेषस्य व्याख्यास्तोत्रकर्त्री च वर्तकेति वर्तयतीति वर्तका शकुनावेवेवा वर्त्येऽपवि कल्पः अ
न्यत्र तु नित्यमेवेत्वामिति बोध्यं अष्टकेति पितरश्च ताः देवताश्च पितृदेवताः तदर्थं कर्मपि
तृदेवत्यं देवतांतात्तादर्थ्ये इति यत् अष्टाविति ब्राह्मणाः यस्यां साष्टका इष्वाशिम्यां तकन् अ
ष्टकान्येति अष्टौपरिमाणमस्याः संख्याया अतिशदंतायाः कन् सूतकेति सूतशब्दात्स्वा

ज्ञानइतिप्राङ्गरवादित्वाज्ज्ञातस्येतिभावः — क॰१

२१९ र्थेकन रंदमस्यास्तीतिमत्वर्थेऽसंगवंदाभ्यामित्यारकन देवतावाःचिवंदारशब्दस्यपुल्लिंगत्वेपिरूपि
मुख्यवाचिनोः स्त्रीलिंगत्वंसंभवत्येवअतएवाविषूत्तरे इत्युपक्रम्यवंदारकोरूपिमुख्यावित्यमरेणो
क्ते उदीचांपकौ पूर्वौपस्यास्साऽप्रर्थगतंस्त्रीत्वमाकेरेप्रारोप्यपकपूर्वीपाइतिस्त्रीलिंगनिर्देशास्त
न स्त्रीप्रत्ययोलभ्यतइत्याह स्त्रीप्रत्ययाकारस्येति अत्रनयासयोरित्यतोनेतिवर्त्तते यकपूर्वस्यस्त्रीप्र
त्ययाकारस्यस्थानेयोकारस्तस्यकात्पूर्वस्योदीचांमते इत्वंनेत्यक्षरार्थः एवंस्थितेफलितमाह इद्वा
स्यादिति एवमग्रेप्यूह्यं षष्ठीस्थानेयोगेत्यनेनैवलब्धेसूत्रेस्थानग्रहणमनन्यमानाविशेषणेषुप
रिभाषानोपतिष्ठतइतिज्ञापनार्थफलंतुवृद्धसंज्ञायामिकःपरिभाषानुपस्थानाच्छालीयादिसिद्धिः
यदितुतत्रेकःपरिभाषोपतिष्ठेत तदाऽप्रोपगवीयइत्यादावेववृद्धाच्छः स्यान्नतुशालीयोमालीय
इत्यादौतत्रह्रस्वाकारवृद्धेरिकः स्थानिकत्वाभावात् तथा अप्रतोगुणइत्यत्रेकपरिभाषोपस्थितौए
धेपचेयजेइत्यादावेवपररूपंस्यात् रितआत्मनेपदानामितिइटएत्वेकृते इकस्थानिकत्वादेकारगु
णस्यभवति पचंतीत्यादौतुनस्यात् तत्रेकस्थानिकत्वाभावादकारगुणस्येत्यपिबोध्यं नव्यास्तुव

द्वाचंतु बाधित्वा अण् गयनादिभ्य इति अण् प्रत्ययोपधास्यादित्येत द्दर्थमृगयनादिगणे व्याकरणशब्दः
पठ्यते यद्यन्न्यमानविशेषणेषु परिभाषा उपतिष्ठेरन् तर्हि तत्पठनं व्यर्थं स्यात् आकारवृद्धेरिक।
स्थानिकत्वाभावेन वृद्धसंज्ञाप्रसंगाभावात् छस्याप्रवृत्तेः तथा च तस्मादेव पाठादुक्तार्थज्ञापनसंभवे
स्थानेग्रहणमिह स्पष्टार्थमित्याहुः सांकाश्यिकेति संकाशेन निर्वृत्तं नगरं सांकाश्यं वुञ्छण् आदि
सूत्रेण संकाशादिभ्यो ण्यः ततो भवार्थे धन्वयोपधाद्वुञ् अकादेशः स च सांकाश्यभवांस्त्रियमा
हेतितदकारस्यापि वैकल्पिकमित्वं स्यात् तस्मादात इत्युक्तं अत्र वदंते यथा यमकारेणाकारस्थानि
कः एवं स्त्रीप्रत्ययस्थानिकोपि नेति छंगाविकल्पमेतत् अकेति समुदायस्य स्त्रीवाचकवुञ् स्थानि
कत्वे यकारमात्रस्यातथात्वात् तस्मादात इति स्पष्टार्थमेवेति शुभंयाइति अन्येभ्योऽपि दृश्यत इ
ति विच् शुभमिति मांतो निपातः सुनयिकेति सुष्ठु नयो यस्याः सुनया ततः कः केण् इति ह्रस्वः एवं सुष्ठु
पाको यस्याः सा भस्त्रैषालुप्तषष्ठीकमिति केचिदिह स्वाइतीछित्वा षष्ठ्याः स्थाने सौत्रत्वाद्व्यत्यये
न जासिति व्याचक्षते प्रत्ययस्थादित्यतोनुवर्तनादाह अत इद्वा स्यादिति ननु नञ्पूर्वाणामपी
त्यपि शब्देन केवलानां संग्रहः क्रियते न तु नञ्भिन्नपूर्वाणामपि तथा च निर्भस्त्रिकेत्यादि नासि

ऽपेहृतस्तदंताविधिरावश्यक इत्याशयेनाह तदंतविधिनैवेत्यादि अप्राङ्गत्वादितिभावः एवं च नञ्पूर्वाणा
मित्यस्यानियमार्थत्वशंकानिरासाय निर्भस्त्रिकेत्यादावव्याप्तिप्रसंगात् अन्यस्यापीति अनुपसर्जन
स्यत्वभावितपुंस्काच्चेत्यनेन सिद्धमित्यर्थः एतयोस्त्विति भस्त्राजाज्ञानां तु सपूर्वाणामपि इत्वं भवत्ये
व तत्र टापः प्रत्ययात्परत्वेन सुपः परत्वाभावाद् असुप इति निषेधाप्रवृत्तेरिति भावः सपूर्वयोरिति पू
र्वावयवसहितयोर्विद्यमानपूर्वपदयोरिति यावत् अंतर्वर्तिनीमित्यादिना स एतद् स इति स्थिते
अकाविकृते अकचः प्रागेव बानज तत्पुरुषे कृते अंतरंगानपीति न्यायेन त्यदाद्यत्वप्रवृत्तेः प्रागे
व समासे केलुकि विशिष्टात्तु न स्तुपि त्यदाद्यत्वे पररूपे च कृते ततष्टाप् स च आद्यस्तुपः परइति
भावः अनेषकेति अज्ञाता एषा एषका न एषका अनेषका अज्ञाता अनेषा अनेषकेति वा लौकिक
विग्रहोऽत्र बोध्यः एवमग्रेपि सूत्रं स्वशब्दस्यातोऽविशेषणमिति यद्यपि हरदत्तग्रंथे अज्ञातस्यान
इत्येतत्स्वशब्दस्य विशेषणमित्युक्तं तथापि तत्र स्वशब्दस्य अत्यनंतरमत इति शेषो बोध्यः इति भाव अप
र्यंतरेत्विति आत्मज्ञाति धनेष्वित्यर्थः नित्यमेवेति स्विकेत्यादावकच्चिकृते आतस्यानीको ऽकारो
दुर्लभ इति प्रकृतसूत्रस्याविषयत्वात् प्रत्ययस्यादिति नित्यत्वप्रवृत्तेः एवं चेहं संतनौ संनिहितं चरंतं

मुनेर्मनोरथैरिवस्विकायामितिस्त्रीहर्षप्लोके भस्त्रैषेति चैकस्य स्विकांमित्यमिति केषांचिद्व्याख्यानंना
दर्त्तव्यमितिभावः वस्तुतोहं संतनाविति प्लोके स्विकायामिति प्रयोगोऽसाधुरेव आत्मीयायांस्वश
ब्दस्यसर्वनामत्वात्स्याडागमप्रसङ्गेरितिन व्याः प्रत्युदाहरणान्यनुक्काउदाहरणान्याह निर्भस्त्रि
केत्यादि निष्क्रांताभस्त्रायाः निर्भस्त्रा निरादयः क्रांताद्यर्थे पंचम्येति समासः उपसर्जनेह्रस्वष्टाप्
ततोऽज्ञाताद्येकः केणइतिह्रस्वः पुनष्टाप् सूत्रैषेति विकृतानिर्देशो विवादितविषयोनतु पास ९५
योरिति बहुपलक्षणमित्यभिप्रेमाह कृतयत्वनिर्देशादिति इह अज्ञाग्नेति स्त्रीलिंगानिर्देशा
ने दज्ञादयः स्त्रीलिंगाएवगृह्यंतेतेनैहाविकल्पोनसुभ्रोऽज्ञोयस्याः सुभ्राजिका जानातीतिज्ञः इगु
पधेतिकः प्रियोज्ञोयस्याः साप्रियाज्ञिकेति निःस्वकेति स्वस्याः निःक्रांतेतिविग्रहो नाविह
स्विकस्याः निःक्रांतेति तथात्वे ह्युपसर्जनेपि निःस्विकेत्यकमेवरूपंस्यात् आतःस्थानिका
कारस्यदुर्लभत्वेनप्रकृतसूत्राविषयत्वात् अभाषित एतस्मादितिनित्यस्त्रीलिंगादित्यर्थः
विहितविशेषणेनतयाव्याख्यानस्यफलमाह बहुव्रीहेरिति ततोविहितस्यानित्यामितिन्न

विद्यमाना खट्वा यस्याः साऽखट्वेत्यत्र शेषाद्विभाषेति समासांतस्य कपो वैकल्पिकत्वात्कपभावपक्षे गोस्त्रि
योरित्युपसर्जनह्रस्वे कृते अखट्वशब्दाद्भाषितपुंस्काद्दापि सत्यज्ञाताटौ कप्रत्यये केऽण इति ह्रस्वऽस्यावि
कल्पस्याप्रवृत्तेः प्रत्ययस्थादित्युपसर्गणेव प्रवर्त्तते परविशेषणत्वेत्वपांविकल्पः स्यादेवेति भावः व
हुव्रीहेरित्युपसर्जनोपलक्षणं तेन अतिखट्वकेत्यादावपि नित्यमेव विकल्पसावेति अखट्वेति
बहुव्रीहौ न स खट्वा स इति स्थिते सुपो धात्विति सो लुक् उपसर्जनह्रस्वत्वं बाधित्वा शेषाद्विभाषे
ति समासांते कपि परत्वात्कृते स्त्रीप्रत्ययांतत्वाभावादुपसर्जनह्रस्वो न प्रवर्त्तते किंतु केऽण इति
ह्रस्वस्य न कपि आपोऽन्यतरस्यामिति वैकल्पिका निषेधात्याहि के ह्रस्वे सत्यभाषितपुंस्काच्चेति विक
ल्पः प्रवर्त्तते तत्र हि खट्वशब्दात्परस्य टापोऽभाषितपुंस्काद्विहितत्वादिति भावः ह्रस्वाभावपक्षे त्वख
ट्वाकेत्येतद्रूपांतरं अधिकारोऽयमिति स्वरितत्वप्रतिज्ञानादिति भावः अभिव्याप्येति अत एव बहु
पुवाशालेत्यत्र रुनास्तिरिति न प्रवर्त्तत इति प्रांचः न चात्र नलोपस्यासिद्धत्वान्नांतलक्षणो ङीप् स्यात्
इति शंक्यं नलोपः सुप्स्वरसंज्ञेति नियमेन ङीपं प्रत्यासिद्धत्वाभावादित्येके अन्ये तु तरपरत्वेच्चा

पचादिविधौप्रतिषेधइतिप्रत्ययलक्षणनिषेधेनग्रहणंतर्हिनीविभक्तिर्माभूत्प्रत्ययत्वाभावान्नलोपस्याप्रस
क्तयाडीप्स्यादेवपरेत्वनोबहुव्रीहेरितिनिषेधान्ङीबभावेडाप्निषेधाविह भवत इत्याहुः अयमेवेति अ
नुपसर्जनाधिकारएवेत्यर्थः टिड्ढाणञ् टिड्ढादयः प्रत्ययास्तैस्तदंतंगृह्यतेतत्रानुवर्त्तमानस्यप्रातिपदि
कंस्याविशेषणं अजाद्यतष्टाबिति सूत्राद्नुवर्त्तमानमप्यत इत्येतत्प्रातिपदिकस्याविशेषणमतश्चतदं
यददंतं ताविधिरतोव्याचष्टे यदिहादितदंतं प्रातिपदिकमिति नद्दद्देवदइत्यादौप्रत्ययस्यैवाटित्वमिति
टिदंतंप्रातिपदिकमितिव्याख्यानंसंगच्छतएवस्तनंधयीत्यत्रतुप्रत्ययस्याटित्वाभावेपिधातोष्टित्व
स्यचरितार्थत्वात् समुदायात्स्यादेवङीबितिवक्ष्यति अन्येतुटादयएवप्रत्ययाः टिदितितुप्रत्ययाप्र
त्ययसाधारणं तेनटितयत्प्रातिपदिकंतद्यदंतंचयत्प्रातिपदिकमित्यर्थः टित्वंतुप्रातिपदिकस्यक्वाचित्प्रत्य
यकृतंक्वाचित्स्वतः क्वाचित्प्रकृतिकृतंभवत्यवयवधर्मस्यसमुदायेउपचारात् तत्राद्यस्योदाहर
णं कुरुचरीति द्वितीयस्योदाहरणं नदडिति पचादिषुटितोस्यपाठात्स्वतएवटित्वंतृतीयंतुधेटष्टि
त्वात्स्तनंधयीतिकृदंतेउदाहरिष्यतीत्याहुः कुरुचरीति कुरुषुचरतीत्यधिकरणेउपपदेचरेष्ट
इतिकर्तरिटः उपसर्जनत्वान्नेहेतिबहवः कुरुचरायस्यासावडुकुरुचरेति बहुव्रीहिरन्यपदा

र्थेप्रधानस्तथाचटिद्दंतस्योपसर्जनत्वान्ङीप्रेत्यर्थः वक्ष्यमाणेति ब्रूञोलृटिलटः स्त्वदेतिशानचबुबोव
चिरितिवच्यादेशः वचपरिभाषणइत्यस्मात्कर्मणिवालटः शानच्स्यतासीतिस्यः कुत्वेषत्वेवक्ष्यमाणेमु
गितिमुक् टित्वादुगित्वाच्चेति स्थानिवद्भावेनेत्यर्थः नचाल्विधित्वात्कथमिह स्थानिवद्भावः इति
न शंक्यः नल्यपीतिज्ञापकाद्दनुबंधकार्येष्वनल्विधाविति निषेधाप्रवृत्तेः अतएवरमायामित्यादौपर
त्वान्ङेः रामिकृते स्थानिवद्भावेनामोङित्वाद्याडापइतियाडागमः सिध्यति ज्ञापकान्नभवतीति
लिङादेशपरस्मैपदानां स्थानिवद्भावेनैवङित्वलाभात्तदागमस्यपासुटोङित्वं व्यर्थंसज्ज्ञापयत्य
नुबंधकार्यमादेशानांनेति सामान्यतोज्ञापयतीतिभावः पिच्चङिन्नेत्यादिगणेवक्ष्यमाणत्वात्तिवा
दिष्वोपदेशिकेनपित्वेनातिदेशिकंङित्वंबाध्यतइतियासुटोङित्वस्यवैयर्थ्याभावान्नततज्ज्ञा
प पतीतिशंकमानंप्रत्याह स्नः शानचः शित्वेनेत्यादि सोपर्णीपीति कद्रूश्चवैसुपर्णीति श्रुतेः सुपर्णी
शब्दादपत्येर्थेस्त्रीभ्योढक् ङ्याबन्तेपीत्येयादेशः नन्वत्र निरनुबंधपरिभाषयाशिलापाठः पक्ष्य
तत्र साधुरित्यधिकारेसभायायोढ छंदसीतिविहितस्तयोरेवढयोर्ग्रहणेनभवितव्यंनतु
ठकः सत्यं शिलायाढस्यस्वभावान्नपुंसकएवप्रवृत्तेः स्त्रियामसंभवात् सभायाढस्यचस

न्मेयीति स्त्रियां छंदसि प्रयोगदर्शनादन्यस्याहि निरनुबंधस्यासंभवाद्लताया सानुबंधको गृह्यते ऐं
द्रीति इंद्रो देवतास्या स्मास्य देवतेत्यण् इंद्रस्येयमिति वा विग्रहस्तस्येदमित्यण् अत्र व्याचक्षते कृद्ग्रहणे गति
कारकपूर्वस्येत्यस्य प्रवृत्त्यभावेपि अणंतस्य प्रातिपदिकाविशेषणत्वेन तदंतांतमपि गृह्यत इति कुंभकारश
ब्दान्ङीप् स्यादेव अस्तु वा कारशब्दादेव ङीप् तथापि कुंभकारीति रूपं सिध्यत्येव न च कारशब्दात् ऽङीपि
तदंतात् स्त्रीभ्यो ढक् प्रत्यये कौंभकारेयो न सिद्ध्येदिति वाच्यं अनुपसर्जनस्त्रीप्रत्ययेतद्वादिनियमाभावा
त् तत्सिद्धेः नापि नियमाभावे कारीशब्दात् कदाचिद्धक् किं कुंभकारेय इति रूपं स्यादिति न शंक्यं समर्थः
पदविधिरिति वक्ष्यमाणत्वेनासमर्थात् तद्धितानुत्पत्तेरिति मनोरमायां त्विह सूत्रे ऽनेकं वाक्यं तत्र अ
नुपसर्जनमणः योऽकारस्तदंतादिति व्याख्यानान्नेह आपिशलमधीते आपिशला ब्राह्मणीति अ
त्र हि प्रोक्तार्थे योऽण् श्रूयमाणः स उपसर्जनं यस्तु प्रधानो ध्येत्रण् प्रोक्ताल्लुगिति स लुप्तः वर्णे प्राधान्या
त् प्रत्ययलक्षणमतष्टाबेव भवतीति स्थितं नन्वेवमापिशलेति रूपासिद्ध्यर्थं अनुपसर्जनग्रहणस्या
वश्यकत्वेन सामर्थ्यापक्षपातकयमेतस्य तदंतविधिज्ञापकत्वेतिचेदत्राहुः स्वरितत्वप्रतिज्ञया अप्र
धिकारोयमित्यधिकारत्वाश्रयणादनुपसर्जनग्रहणस्य ज्ञापकत्वं संभवत्येवेति गौरोत्सीति उत्से

नवाऽऽत्सादिभ्योऽजनन्वते नैवं सिद्धे शार्ङ्गरवाद्यञ इत्यत्राञ्ग्रहणं व्यर्थं अञंतस्याद्युदात्तत्वेन ङीपङीनो
स्वरे विशेषाभावात् मैवं उत्सस्यापत्यं स्त्री औत्सीत्यत्र अञंतलक्षणं ङीपं बाधित्वा परत्वाज्जातिलक्षणे ङी
षि प्राप्ते तद्बाधनार्थं तस्यावश्यकत्वात् न चैवं शार्ङ्गरवाद्यञ इति ङीनासिद्धमिदं रूपमित्यञ्ग्रहण
मिह न कर्त्तव्यमिति वाच्यम् तत्र जातेरित्यनुवृत्तेः अन्यथा शार्ङ्गरवस्य स्त्री शार्ङ्गरवी औत्सस्य स्त्री औ
त्सीत्यादौ पुंयोगेऽपि परत्वान्ङीन्स्यात्तु ङीष् इष्यते तु पुंयोगे ङीषेव तस्माद्बाह्वाद्यर्थं स्वजातित्वेनापरि
भाषणाद्बाह्वाद्यर्थं ङीवर्थमिहाप्यञ्ग्रहणमावश्यकमेवेति दिक् ऊरूद्वयसीत्यादि ऊरुप्रमाणम
स्याः स्याः प्रमाणे द्वयसच्दघ्नञ्मात्रचः पद्यत्रनलोकोऽति स्त्रचेत्तान्निति वद्वयसज्जिति मात्रञ्श्वकारे च६
ण प्रत्याहारो गृह्यते तेन द्वयद्घ्नञ्मात्रञ्ग्रहणमिहाकर्त्तुं शक्यं पंचतयीति पंच अवयवा यस्याः सं
ख्याया अवयवे तयप् आद्विकीति तेन दीव्यतीति ठक् लवंकीती लवणं पण्यमस्याः लवणाट्ठञ् ठक् गी
ठञोर्भेदेनोपादानं ठान्ते वृत्त्यर्थं तेनेह न दंडोऽस्त्यस्याः दंडिका अत इनिठनाविति ठन् अत एव ञिठोऽपि न ङी
प् काशिषु भवा काशिका काश्यादिभ्यष्ठञ्ञिठौ पादृशीति त्यदादिषु दृश इति कञ् आ सर्वनाम्न इत्या
कारः इत्वरीति एतीति छ्वीला इण्नशजिसर्त्तिभ्यः क्वरप् क्वरपो न्यतरानुबंधोपादानं स्पष्टार्थं एके

नैववररचोव्याहतिसिद्धेः विन्यस्तमंगलमहौषधिरीश्वरायाः इति भा रवितत्रस्येशभासेति वररुचिः ई-

त्रेधा श्वरीति तु पुंयोगलक्षणङीष्यंतोदात्तमेकं ईश्वोपधाया इत्यनुवर्तनीयाश्नोतेः आशुकर्मणि वरडित्येणा

दिके वरटिटित्वान्ङीपिमध्योदात्तमपरं ईशेः क्वनिपि ङीब्रपोराद्युदात्तमन्यत् ताच्छीलिक इति अपंभा

वः शीलं छत्रादिभ्यो णइति योणस्तस्मिन्नणकार्यं भवति कार्मस्ताच्छील्य इति ज्ञापकात् तत्रादिग्रस्नि

त्यणि विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते यदि तु णप्रत्यये अणकार्यं न स्यात्तर्हि किं तेन ताच्छीलि

के एवं अणकार्यज्ञापनान्नेह दंडः प्रहरणमस्यां क्रीडायां दांडा तिहस्या प्रहरणमिति णः छत्रादिभ्यो णित्ये

वसत्त्वमस्तु किमनया कुसृष्ट्येति तु बहवः चौरीति चुरणशीलमस्याः नञस्नञ् शतेरुतात्वत्रसंख्युन्

ग्रहणं स्त्रैणपौंस्नप्रकरणख्युनामिति पठितं तच्च भाष्यविरुद्धमित्युत्तरत्र स्फुटीभविष्यति स्त्रैणीपौंस्नी

ति स्त्रीपुंसाभ्यामिति नञ्स्नञौ शाक्तीकीति शक्तिः प्रहरणमस्याः शक्तियष्ट्योरीकक् आढ्यंक

रणीति अनाढ्यः आढ्यः क्रियतेऽनेनेत्यर्थे आढ्यसुभगेत्यादिना कृञः ख्युन् युवोरित्यनादेशः अ

रुर्द्विषदिति मुम् तरुणी तलुनीति तरुणतलुनयोर्गौरादिषु पाठात् ङीप् ङीषोः पर्यायो बोध्यः स्व

रे विशेषः कृवृदारिभ्य उनन् त्रो रश्चेति लो वेति तरुणतलुनयोरुनन्प्रत्ययान्तत्वेनाद्युदात्त

ततासेवङीषित्वंतोदात्ततेति यञश्च योगविभाग उत्तरार्थः प्राचां ष्फ स्तद्धित इत्यत्र यञ एवानुवृत्तिर्यथा
स्यात् हलस्तद्धितस्य हल इति पंचमी यस्येति चेति सूत्रादीतीत्यनुवर्त्तते नस्तद्धित इत्यतस्तद्धित इ
तिनानुवर्त्तते अपत्यस्य चेत्युत्तरसूत्रे पुनस्तद्धितग्रहणात्तदाह हल उत्तरस्येत्यादि तद्धित इत्यनु
वृत्तौ त्विहापि स्यात् सांकाश्यकः कापिल्यकः संकाशादिभ्यो ण्यः ततो धन्वयोपधाद्दिति वुञ्
उपधाभूतस्येति सूर्यतिष्येत्यत उपधाया इत्यनुवर्त्तत इति भावः ननु यस्येति चेति यञो ऽकारलो
पे कृते यकारस्य ईकारपरत्वमस्त्येव किमुपधाग्रहणानुवृत्त्या न चेल्लोपस्य स्थानिवद्भावः ॥
यलोपे तन्निषेधात् अत्राहुः यलोपे कर्त्तव्ये अल्लोपस्याभीयत्वेनासिद्धत्वादुपधाग्रहणानु
वृत्तिरभ्युपगंतव्येति अन्ये त्वाहुः सूत्रारंभसामर्थ्यादल्लोपस्यासिद्धत्वं न भवति तथा चोपधा
ग्रहणं विनापि नात्रक्षतिः एवं च सूर्यतिष्येति सूत्रेप्युपधाग्रहणं त्यक्तुं शक्यमुक्तयुक्तेरिति गार्गी
ति गोत्रप्रत्ययान्तस्य जातित्वेपि योपधत्वादजातेरिति ङीष् न भवति तथा च आद्युदात्तमेवेदंप
दं अनपत्याधिकारेति यद्यप्यपत्यग्रहणं कर्त्तव्यमित्येव वार्त्तिकं तथाप्यपत्याधिकारविहि
त परं तत् तादृशाश्च गर्गादियञेव ननु देवाद्यञ् तस्यापत्याधिकारात्प्रागेव पाठात् अतएव

भाष्यकृता यञश्चेत्यत्र कञ्करपो ऽयञश्चेति गर्गादिभ्यो ऽयञित्यत्रादन्तेति च अकारः प्रश्लिष्टः ए
वं च यञञो ऽश्चेति सूत्रे ऽपि यस्कादिभ्यो गोत्रे ऽयञञो ऽश्चेत्यकारः प्रश्लिष्टः एतच्च मनोरमायां ग्रंथा
नुरोधेनोक्तं नव्यास्तु अधिकारग्रहणमिहापार्थकं यथाश्रुतवार्त्तिके नैव ङीपे ऽभावाद्दैव्येति
रूपसिद्धेः नच दैवस्यापत्यं स्त्री दैव्येति रूपासिद्धिः शंक्या ऽयञश्चेति भाष्यकारोपनिष्कर्षात्तत्सि
द्धेः नहि देवाद्यञञावित्यत्रापि यञित्यकारः प्रश्लेष्टुं शक्यते किं चाधिकारग्रहणे ऽभिजितोऽप
त्यं स्त्रीत्यणंतात्स्वार्थे अभिजिद्विदभृदित्यादिना यञि आभिजितीति रूपं न सिद्ध्येत् अग्रहणे ऽय
ञित्यकारप्रश्लेषेण भाष्यकारस्य रीत्यापि इह ङीपस्संभवात् इत्याहुः स्यादेतत् अकारं प्रश्लिष्य
गर्गादिभ्यो यञि कृते गार्ग्यीति रूपं न सिध्येन्नैवं वार्त्तिके ऽकारप्रश्लेषे कृते ऽपत्याधिकाराद्यन् प्रत्याख्या
न संभवतीत्यपत्यग्रहणं कर्त्तव्यमिति वार्त्तिके नारंभणीयं प्रत्याख्यानाय भाष्यकृताऽका नाय भा
रप्रश्लेषे कृते ऽपि तस्येत्संज्ञकत्वेन लुप्तत्वादिष्टसिद्धेः एवं च कञ्करप ञ्युनामिति पाठः कञ्करपो ऽय ष्यकृता
ञश्चेति भाष्याविरुद्ध इति स्पष्टमेव प्राचां ष्फ तद्धितः तद्धितग्रहणं ष्फप्रत्ययांतस्य प्रातिपदिक
संज्ञार्थं तेनाविह गौरेति ङीष्सिध्यति ननु प्रातिपदिकसंज्ञां विनापि षित्करणसामर्थ्याद्देवङी

२२३

ष्मभविष्यति किमनेन तद्धितग्रहणेन नुवषजंतेयस्येति चेति लोपार्थं तदिति वाच्यं सवर्णदीर्घेणापि
रूपसिद्धेर्लोपस्यानावश्यकत्वात् एवं तर्हि तद्धितग्रहणमिञंताद्यपेक्षाचेत्स्यफो भवतीति ज्ञाप
नार्थं तेन आसुरेरुपसंख्यानमिति वक्ष्यमाणं सिद्ध्यति षः प्रत्ययस्य आदिर्ञिटुडव इत्यतः आ
दिरित्यनुवर्त्तत इत्यभिप्रेत्याह प्रत्ययस्यादिरिति प्रत्ययस्य किम् षो ड षषडुत्वमित्यत्र उप
देशस्योपेयषकारः एतच्च कौस्तुभे स्थितं आदिः किं आविषः म हिषः आविमथ्योष्टिषच् नन्वत्र प्र
योजनाभावादेव षकारस्येत्संज्ञा न भविष्यतीति टित्वादेव आविषीमहे बीति रूपसिद्धेः नच पक्षे ङीष्यंतोदात्तः
प्रयोजनमिति वाच्यं अनुदात्तस्य च यत्रोदात्तलोप इत्युदात्तनिवृत्तिस्वरेणैव ततः परस्य ङी पोप्युदात्त
त्वात् अत्राहुः विनिगमनाभावेन पक्षे टकारस्यापि श्रवणं स्यात् तथा च षित्वात् ङीषा विटीत्यादि रू
पसिद्धिः स्यादतः षकारस्यैव श्रवणं भवतु मा कदाचिट्टकारस्य श्रवणं भूदित्येतदर्थमादिग्रहणा
नुवृत्तिरिति आयने आयनी नोर्नेकारस्य नेत्वं फिनोनित्करणसामर्थ्यात् फकारादिषकार
उच्चारणार्थस्तेन ठक्फिञामादेशाः सिद्ध्यति आदिग्रहणं किं ऊरूदघ्नमित्यादौ मा भूत् प्रत्ययेति
किं धातोरादीनां मा भूत् फक्कति ढौकते खनति छादयति क्रूणते बजादिषु तु चजोः कुघिण्ण

घञ्घस्यापि ढ्वोएय च्चैती
तरेतरयोगद्वंद्वः ।

दोनार

एचतोरित्यादिनिर्देशेन इत्संज्ञायाभावान्नित्यादेशाभावः शमेर्ठः शाठः इत्येवमादीनामेतेष्वादेशानभ
वंति उणादयो बहुलवचनादिति दिक् क्रमादिति फ आयन् ढ एय् ख ईन् छ ईय् घ इय् इत्यर्थः स्त्रियामे
वष्फप्रत्ययविधानादत्र ङीष् न स्यादित्याशंक्याह षित्वसामर्थ्यादिति एवमेव स्त्रीत्वमुभाभ्यामुच्य
त इति भाव सर्वत्रग्रहणमुत्तरसूत्रादिहापकृष्यते बाधकबाधनार्थं तेनावट्याच्चेति वक्ष्यमाण
परमपि चापं बाधित्वा प्राचां मते आवट्यशब्दात् ष्फ एव भवति चापविधेस्तूदीचां मते सा
वकाशत्वात् आवट्यायनी एवं याप्यजस्त्राद्विषयेपि प्राचां ष्फ एव शार्कराक्ष्यायणीति यथा
सर्वेषां मत इत्यर्थस्तदेतत्फलितमाह नित्यं ष्फः स्यादिति नन्वारंभसामर्थ्यान्नित्यत्वे सिद्धे स
र्वत्रग्रहणं व्यर्थमिति चेदत्राहुः पूर्वसूत्रे बाधकबाधनोपयुक्तस्य तस्येह स्पष्टार्थमभ्युपगमा
न्नवैयर्थ्यमिति यञ इत्यनुवर्तनादाह यञेतेभ्य इति लोहितादिर्गर्गाद्यन्तर्गण इति भावः लोहि
त्यायनीति सांशित्यायनी वाभ्रव्यायणीत्यादयोपि ज्ञेयाः ननु गर्गादौ कतकएव शाकलेति प
ठ्यते तथा च शाकल्यायनीति रूपं न सिद्ध्येत् यदि तु लोहितादिकार्यार्थं कतशब्दात्प्रागेव शक
लशब्दः पठ्येत तर्हि शाकल्यस्य छात्राः शाकला इत्यत्र कण्वादिभ्यो गोत्रे इति कण्वादिकार्यमण्

नसिध्येत उच्यते कतकएव शाकलेति गणपाठे कएवशब्दात्पूर्वं शकलशब्दः पठितव्यः कतंतें इत्यत्र
त कस्यांतः कतंतः कतंतो तो येषां ते कतंताः शाकंध्वादित्वात्पररूपं कतंतश्च कतंताश्चेति वहुव्री
हितत्पुरुषयोरेकशेषोऽभ्युपेयस्तथा कएवादिभ्य इत्यत्रापि कएव स्यादिः कएवादिः कएवः आदि
र्येषामिति वहुव्रीहिः तत्पुरुषयोरेकशेषस्तथा च सर्वेष्टसिद्धिरिति कौरव्यटाप्ङीषोरिति ङीपः
प्राप्त्यभावात्कौरव्यशब्दाट्टाप् मांडूकात्तु ङीषिति भावः यद्यपीह टाप्ङीपोरिति पाठः प्रायेण
दृश्यते तथापि तत्र ङीविति लेखकप्रमाद एव या[illegible]रिभाषिकस्य पौत्रप्रभृतिगोत्रस्येव जा
तित्वान्ङीषः प्राप्तिर्नेति मतांतराभिप्रायेण वा तयोक्तमिति वोध्यं कौरव्यसाहचर्यान्मंडूकश
ब्दोप्यपत्यप्रत्ययांत एवेह गृह्यते न तु तस्येदमित्यणंतस्तेन यद्यसौ कूपमांडूकीत्येवेति भट्टिप्रयोगः
सिद्धः तत्र हि मंडूकस्यापत्यं भार्येति विवक्षायां तस्येदमित्यण् वयासिकोलव्हताशारीरावस्थावयं
स्वर्यप्रकरणादिकमनपेक्ष्य श्रवणमात्रेण वयः प्रतिपादयति स वयोवाचीत्युच्यते अंतरंग
त्वात्तेनेह न उत्तानशया लोहितपादा इह प्रकरणादिना वयसः प्रतीतावपि शब्दादप्रतीतेः
अवालोपि हि व्याघ्रादिवशाद्युत्तानाशेते अलक्तकेन रक्तचरणा भवति प्रथमेति किं द्वि

कुमारीति प्रथमवयोवचन एवायंशब्दो न त्वन्तत्वप्रवृत्तः । ? स्यापि कुमार इति प्रयोगात् वृद्धकुमा
रीतितु गौणः प्रयोगः वयस्यचरम इति यौवनेन प्रथमं वयः किंतु द्वितीयमिति वार्त्तिकारंभः उपच
यापचयलक्षणे द्वे एव वयसी इति पक्षे यौवनस्यापि शयम्यात्तच्चेण्णेवासिष्यतीति वोध्यं वयांसि
चत्वारीत्येके पक्षाहुः आद्ये वयसि नाधीतं द्वितीये नार्जितं धनं तृतीये न तपस्तप्तं चतुर्थे किं
करिष्यतीति त्रीणीत्यन्ये पक्षाहुः पिता रक्षति कौमारे भर्त्ता रक्षति यौवने पुत्रस्तु स्थाविरीभा
वेन स्त्री स्वातंत्र्यमर्हतीति त्रिलोकीति त्रयाणां लोकानां समाहारे तद्धितार्थे द्विगुः अका
रांतोत्तरपदो द्विगुरिति स्त्रीत्वं त्रिफलेति अत्र द्विगोरिति ङीप्प्राप्नोति न तु पाककर्णेति ङीप्
तत्रजातेरित्यनुवर्त्तेः अनीकेति अनीकमग्रतात्रयाणमनीकानां समाहारः अजादेराकृतिग
णत्वाद्दाविति अनीकाधिकरणे मीमांसकाः पंचाश्वेति नन्वत्र द्विगोरिति ङीप्रमाभूत् ढग
न्तत्वात्तुस्यादेव न चापरिमाणेति निषेधस्य निरवकाशतेति वाच्यं पंचानामजानां निमित्तं ध
नपाति संप्रुक्तेः पंचाजाबं चोष्ट्रत्यादौ सावकाशत्वात् तत्राहि गो घचोऽसंख्येति यस्नत्ययस्या
· घर्द्व पूर्वैत्यादिना लुगिति चेत् अत्राहुः टकपोऽकार इति व्याख्यानात् ढगंत लक्षणे ङीब्नेति

द्विविस्तेति सुवर्णविस्तो हेम्नोऽक्षे इत्यमरः आचितो दशभाराः स्युः द्विकंबल्येति द्वाभ्यां कंबलाभ्यां क्रीता कं
बल्यपूर्णोपलशतं कंबलाच्च संज्ञायामिति यत् ततः क्रीतार्थस्य ठञो लुक् द्व्याढकीति द्वाबाढकौ प
चतीति विग्रहे आढकाचितपात्रात् खो ऽन्यतरस्यां द्विगोष्ठंश्चेति खट्ठञौ विहितौ ताभ्यामुक्तो पक्षे प्रा
ग्वतीयष्ठञ् तस्याध्यर्द्धेति लुक् एतेन द्व्याचिता व्याख्याता स्यादेतत् कांडांतादित्युत्तरसूत्रे परि
तः सर्वतोपेनमीयते तत्परिमाणम् आढकं कुडवादि न तु पारिक्षेत्रैकमात्रमिति मनोरमायां स्थितं
तं यथा चापरिमाणत्वाद्धेवासिद्धे विस्तादिग्रहणमिह व्यर्थं स्यात् अत्राहुः उन्मानस्यनिषेधो विस्ता
का दीनामेवेति नियमार्थं तद्ग्रहणं तेनाद्विपौर्णी द्व्यंगुलीत्यादि सिध्यतीति कांडांतात् षोडशहस्तप्र
माणो दंडः कांडः यद्यपि विशेषणेन तदंतविधिः सिद्धस्तथाप्यसत्यंतग्रहणे क्षेत्रे इत्येतत् कुतत्वात्
कांडस्यैवाविशेषणं स्यान्न तु कांडांतस्य तत्र द्वाभ्यां कांडाभ्यां कांडप्रमिताभ्यां क्षेत्राभ्यां क्रीता
द्विकांडी वडवेत्यत्र निषेधः स्यात् इह तु निषेधो न स्यात् द्विकांडा क्षेत्रभक्तिरिति अत्र हि कांडंप्र
माणे वर्त्तते कांडांतस्तु क्षेत्रे अतो ऽत ग्रहणं कृतं इह द्विगोरित्यनुवर्त्तते तद्धितलुकीति चतद्दाह ॥ न२
द्विगुस्ततो नडीबित्यादि मात्रच्च इति द्वपसोऽलुगीति प्राचेत्यं नादत्तं ज्यंप्रथमस्य द्वितीयस्य ऊर्द्ध

मानेमत्तैममेतिसिद्धत्वादितिभावः द्विकांडी रज्जुरिति द्वेकांडे प्रमाणमस्याः पूर्ववत्तद्धितलुक् द्विगोरिति
ङीप् नन्विह परिमाणांतादिति पूर्वेण निषेधः स्यात् कांडशब्दस्यायामपरतया अपरिमाणपर्यायत्वात् प
ती रितः सर्वतः आरोहतः परिणाहतश्च येन मीयते तद्धि परिमाणं आढककुडवादि न तु यथाकथंचित्
परिच्छेदकमात्रं यदाहुः ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु
सर्वत इति अत एव द्विहस्ता भित्तिरित्यत्र ङीप् न भवति चेत् अत्राहुः नियमार्थमिदं तेनात्रैव निषेधो यथा
स्यादिति तथा च द्विकांडी रज्जुरित्यत्र ङीबेव सूत्रारंभफलमिति पुरुषात्प्रमाणे अपरिमाणांतत्वा
न्निषेधे प्राप्ते विकल्पार्थं वचनं पुरुषशब्दो यद्यपि लोके जातिवचनस्तथापि द्वौ प्रमाणमस्या इति वाक्ये प्रमा ५८ बो
णशब्दसामानाधिकरण्यात् प्रमाणे वर्तत एव वृत्तौ तु शब्दशक्तिस्वाभाव्यादेव तथा च शुल्वसूत्रे पंचा
रत्निः पुरुष इति द्विपुरुषीति अत्र प्रमाणे लोपौ द्विगोर्नित्यमिति द्वयसचो लुगिति न्यासकारः नन्विह तद्धि
तलुक् दुर्लभः पुरुषशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणे ल इति श्लोकवार्त्तिकस्याप्रवृत्तेः पेहिमादिवत्प्र
माणत्वेन प्रसिद्धास्तत्रैव तत्प्रवर्तते न तु पुरुषशब्देपि अन्यथा पुरुषद्वयसमित्यत्रापि लुक् स्यात् न चैवं
द्वयसचः प्रवृत्तावपि नास्मात्स्यात्तामिति वाच्यं ऊर्ध्वमानेमतोममेति वचनात् एवं पुरुषात्प्रमाणे इति

२२६ वैकल्पिकस्यापि ङीपः सामर्थ्यादेव प्रवृत्तिः किंतु दुर्लभ इति चेत् अत्राहुः आस्तिवह प्रमाणे ल इत्यस्याप्र
वृत्तिस्तथापि स्त्रलभ्रणव लुक् पुरुषात्प्रमाणे इति सूत्रे हि द्विगोस्तद्धितलुकीत्यनुवर्त्तते तत्सामर्थ्याल्लु
प्प गप्याहितइति स्ववचत्वात् इति प्रमाणे किं द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा योगः तद्धितलुकीत्येव स
माहारे पंचपुरुषी नन्विह पुरुषशब्दः प्रमाणे न वर्त्तत इति योगविकलमेतदिति चेत् इत्राहुः प्रमाण
र्थवृत्तीनामेव पुरुषाणाम् अत्र समाहारान्त योगविकलता तत्र तद्धितलुकीत्यनुवृत्तेऽपं चपुरुष
शब्दाद्विकल्पः स्यादिष्यते तु द्विगोरिति नित्यं ङीबिति ऊधसोनङ् नादेशेनैव सिद्धे नङ्करणं ध
नुषश्चेत्युत्तरार्थं अन्यथा शार्ङ्गधन्वेति न सिद्ध्येदित्याहुः वस्तुतस्तु इहार्थमप्यावश्यकमेवान्यथा
गा अनोलान्तणिकत्वेन अल्लोपाप्रसंगादित्यन्ये इह बहुव्रीहौ सक्थ्यक्ष्णो रित्यतो बहुव्रीहावित्यनु
वर्त्तते इत्याह ऊधोंतस्य बहुव्रीहेरिति समासांतप्रकरणस्थत्वेप्यनङो न प्रत्ययत्वं अन्यथा ङितश्चे
पर्थ्यापतेरिति प्राचः वस्तुतस्तु अनङ इव प्रत्ययत्वेप्यादेशत्वमविरुद्धं कुंडोध्नीत्यत्र ङीषि कृते स्वरे विशे
षाभावादिति बोध्यं स्त्रियामिति उपसंख्यानाल्लभ्यमेतत् डाप् ङीब्विधिषु इति डाबुभाभ्यामिति वै
कल्पिको डाप् अनङ् पंधालोपिनोन्यतरस्यामिति विकल्पेन ङीप् अन्नो बहुव्रीहेरित्यनेन नञ्न्ते

न्यइति प्राप्तस्य ङीपो निषेधइतिविवेकः ङीष्स्यादिति प्रकृतो ङीबेतुनविहितः स्वरेविशेषात् कुंडोघ्नीति कुंड
मिवऊधोयस्याः सावहुव्रीहेः किंप्राप्ताऊधःप्राप्तोधः प्राप्तापन्ने चेतिसमासः धेनुकमिति अचित्तहस्तीति
समूहार्थेढकइस्नुस्नुक्रांतात्कः स्त्रियामित्युपसंख्यानादितिनान्विहैवलाबवार्थंवहुव्रीहेरूधसोङीषनस्ये
तिसूत्रमतांश्चनङ्चेतिवासमासांतेषुऊधसोनङितिचत्यक्त्वा धनुषोनङित्येवपठ्यतां मैवंकवभावेसावका
शस्यास्यपद्येकपावाधापत्तेः सिद्धांतेतुअनङ्समासांततयाशेषत्वमेवेहनास्तीतिनकप् संख्याव्यया
आदिग्रहणंत्यदांतरव्यवधानेपिस्यादेवाद्विविधोघ्नो द्वामवहुव्रीहिविशेषणत्वादेवसिद्धेअंतग्रहणंस्व
रूपप्रतिपत्त्यर्थं संख्यादेरिति समासानिर्देशोपिस्वरितत्वबलादेकदेशएवानुवर्त्तत इतिभावः अनुनुवर्
त्तेरितिभाष्यकृतानुवर्त्तितत्वादितिभावः एवंबोध्द्रामेत्यत्र द्दामहायनांताच्चेत्यस्याप्रवृत्त्यापूर्वोक्तेषुदाप् ५१५
ङीप्निषेधेषुप्राप्तेषुवहुराज्ञीवहुपत्त्रयंभवत्यतोव्याचष्टे डाप्निषेधावपीति नित्यसंज्ञाअनउपधा
लोपिनइतिविकल्पस्यापवादः अंरंभस्यापर्यायात्सिद्धेपिनित्यग्रहणमुत्तरत्रविकल्पानुवृत्तिसूच
नायकृतमित्याहुः शतमूर्ध्नीति इहपंचद्दाम्नीतिक्वचित्पाठः सचायुक्तः दामहायनांताच्चेत्यनेनैव
सिद्धत्वात् केवलद्वंद्वसि मामिकीतन्नूमित्यत्रावरूणयोर्भागधेयीतन्वः संतुपापाः उतापरीभ्यः समानी

२२१ वक्त्राकृतिः आर्यकृतीसुमंगलीसुमंगलीरियंवधूरित्यत्रतुछंदसीवनिपाविति मत्वर्थेईप्रत्ययोवोघः शि
वारूढंस्यभेषजीत्यन्यत्रकेवलेत्याद्दीतिमामकनरकयोरूपसंख्यानादित्वंमामिकाभागशब्दात्तुल्लिंग
